श्रीमते रामानुजाय नमः देहार्द्धयोगः शिवयोः स श्रेयांसि तनोतु वः दुःप्रापमपि यत्स्मृत्या ज
नः कैवल्यमश्नुते १ त्रिविधान्यपि दुःखानि यदनुस्मरणान्नृणां प्रयांति सद्यो विलयं तं स्तुमः
शिवमव्ययं २ पतंजलिमुनेरुक्तिः काप्यपूर्वा जयत्यसौ पुंप्रकृत्योर्वियोगोपि योग इत्युदितो य
या ३ जीयात्तिवाचः फणिभर्तुरंतरस्फुरत्तमस्तोमनिशाकरत्विषः विभाव्यमानाः सततं मनांसि या
सतां सदानंदमयानि कुर्वते ४ शब्दानामनुशासनं विदधता पातंजले कुर्वता वृत्तिं राजमृ
गांकसंज्ञकमपि व्यातन्वता वैद्यके वाक्चेतोवपुषां मलः फणिभृतां भर्त्रेव येनोद्धृतस्तस्य
श्रीरणरंगमल्लनृपतेर्वाचो जयंत्युज्ज्वलाः ५ दुर्बोधं यदतीव तद्विजहति स्पष्टार्थमित्युक्तिभिः
स्पष्टार्थेष्वतिविस्तृतिं विदधति व्यर्थैः समासादिकैः अस्थानेनुपयोगिभिश्च बहुभिर्जल्पैर्भ्रमं
तन्वते श्रोतॄणामिति वस्तुविप्लवकृतः प्रायेण टीकाकृतः ६ उत्सृज्य विस्तरमुदस्य विकल्पजा
लं फल्गुप्रकारमवधार्य च सम्यगर्थान् संतः पतंजलिमते विवृतिर्मयेयमातन्यते बुधजनप्रति
बोधहेतुः ७ १ अथ योगानुशासनं १ अनेनैव सूत्रेण शास्त्रस्य संबंधाभिधेयप्रयोजनान्याख्याय
ते अथशब्दोधिकारद्योतको मंगलार्थश्च युक्तिर्योगः समाधानं युजिः समाधौ अनुशिष्यते व्याख्या
यते लक्षणभेदोपायफलैर्येन तदनुशासनं योगस्यानुशासनं तदाशास्त्रपरिसमाप्तेरधिकृतं बोद्धव्यमित्यर्थः तत्र शास्त्र
स्य व्युत्पाद्यतया योगः ससाधनः सफलोभिधेयः तदुत्पादनं च फलं व्युत्पादितस्य योगस्य फलं कैवल्यं
शास्त्राभिधेययोः प्रतिपाद्यप्रतिपादकभावलक्षणः संबंधः अभिधेयस्य योगस्य तत्फलस्य च
कैवल्यस्य साध्यसाधनभावः एतदुक्तं भवति व्युत्पाद्यस्य साधनानि शास्त्रेण प्रदर्श्यंते तत्साधनसिद्धो

योगः कैवल्यं फलमुत्पादयतीति तं को योग इत्यत आह योगश्चित्तवृत्तिनिरोधः चित्तस्य निर्मलसत्व
परिणामरूपस्य या वृत्तयो अंगांगिभावपरिणामरूपास्तासां निरोधो बहिर्मुखपरिणतिविच्छेदादंत
र्मुखतया प्रतिलोमपरिणामेन स्वकारणे लयो योग इत्याख्यायते ॥ स च निरोधः सर्वासां चित्तस्य
भूमीनां सर्वप्राणिनां धर्मः कदाचित् कस्यांचिद्भूमावाविर्भवति ताश्च क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरु
द्धमिति चित्तस्य पंचभूमयः चित्तस्यावस्थाविशेषाः तत्र क्षिप्तं रजस उद्रेकादस्थिरं बहिर्मुखतया सुखदुः
खादिविषयेषु विकल्पितेषु व्यवहितेषु सन्निहितेषु वा रजसा प्रेरितं तच्च सदैव दैत्यदानवादीनां मू
ढं तमस उद्रेकात् कृत्याकृत्यविभागमंतरेण क्रोधादिभिर्विरुद्धकृत्येष्वेव नियमितं तच्च सदैव रक्षः
पिशाचादीनां विक्षिप्तं तु सत्वोद्रेकाद्वैशिष्ट्येन परिहृत्य दुःखसाधनं सुखसाधनेष्वेव शब्दादिषु
प्रवृत्तं तच्च सदैव देवानां एतदुक्तं भवति रजसा प्रवृत्तिरूपं तमसा परापकारनियतं सत्वेन सुखम
यं चित्तं भवति एतास्तिस्रश्चित्तावस्थाः समाधावनुपयोगिन्यः एकाग्रनिरुद्धरूपे द्वे च सत्वोत्क
र्षाद्यथोत्तरमवस्थितत्वात् समाध्युपयोगं भजेते सत्वादिक्रममुत्क्रमेत्वयमभिप्रायः द्वयोरपि र
जस्तमसोरत्यंतहेयत्वात्तदर्थं रजसः प्रथममुपादानं यावन्न प्रवृत्तिर्दर्शिता तावन्निवृत्ति
र्न शक्यते दर्शयितुमिति द्वयोर्व्यत्ययेन प्रदर्शनं सत्वस्य तदर्थं पश्चात्प्रदर्शनं ॥ सत्व [illegible] के
षे रोत्तरे द्वे भूमी योगोपयोगिन्याविति ॥ अनयोर्द्वयोरेकाग्रनिरुद्धयोर्योश्चित्तस्यै [illegible] मनरू
वः परिणामः स योगः किमुक्तं भवति एकाग्रे बहिर्वृत्तिनिरोधः निरुद्धे च सर्वासां वृत्तीनां सं
स्कारा [illegible] लयः इत्यनयोरेव भूम्योर्योगस्य संभवः ॥ इदानीं सूत्रकारश्चित्तवृत्तिनिरोधपद
[illegible] मः [illegible] तदा द्रष्टुः स्वरूपेऽवस्थानं द्रष्टुः पुरुषस्य तस्मिन्काले
[illegible] पमर्थेः उत्पन्नविवेकख्यातेश्चित्तसंक्रमाभावात

२

[illegible] परिणामाभावात् [illegible] मनःस्वरूपावस्थानं स्थितिर्भवति व्युत्थानदशा
[illegible] किं स्वरूपमित्याह वृत्तिसारूप्यमितरत्र ४ इतरत्र योगादन्यस्मिन्काले वृत्तयो वक्ष्यमाणा
[illegible] ताभिः सारूप्यं तद्रूप्यं अयमर्थो यादृश्यो वृत्तयः सुखदुःखमोहात्मिकाः प्रादुर्भवंति
तादृग्रूपः संवेद्यते [illegible]भिः पुरुषस्तदेवं यस्मिन्नैकाग्रतया परिणतवस्तुनि चिच्छक्तेः विवि
क्तैः स्वात्मिन्रूपे प्रतिष्ठतो भवति यस्मिंश्चेंद्रियद्वारेण विषयाकारेण परिणते पुरुषस्तदाका
र इव परिभाव्यते यथा जलतरंगेषु चलत्सु चंद्रश्चलन्निव प्रतिभासते तत् चित्तवृत्तिपदमाख्यातु सप्तमिः
माह वृत्तयः पंचतय्यः क्लिष्टाक्लिष्टाः ५ वृत्तयश्चित्तस्य परिणामविशेषाः वृत्तिसमुदायरूपस्यावय
विनस्यावयवरूपा वृत्तयस्तदपेक्षया तयप्प्रत्ययः एतदुक्तं भवति पंच वृत्तयः कीदृश्यः क्लिष्टाक्लिष्टाः
क्लेशैर्वक्ष्यमाणलक्षणैः क्रोडीकृताः तद्विपरीताऽक्लिष्टाः [illegible] समुदायस्य आख्या
यंते प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ६ आसां क्रमेण लक्षणमाह प्रत्यक्षानुमानागमाः प्रमा
णानि ७ अत्रातिव्युत्पत्त्वा प्रमाणानां शास्त्रकारेणाभेदतः [illegible] अनवगतत्वाल्लक्षणस्य
न पृथक्कृतत्वं लक्षणं कृतं प्रमाणलक्षणं तु अविसंवादिज्ञानं प्रमाणं इंद्रियद्वारेण बाह्यवस्तू
परागाच्चित्तस्य तद्विषया सामान्यविशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं
गृहीतसंबंधाल्लिंगाल्लिंगिनि सामान्यात्मनाऽवसायोऽनुमानं आप्तवचनमागमः एवं प्रमा
णरूपां वृत्तिमाख्याय विपर्ययरूपमाह विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं ८ अतस्मिंस्त
र्थे तथोत्पद्यमानं ज्ञानं विपर्ययः यथा शुक्तिकायां रजतज्ञानं अतद्रूपप्रतिष्ठमिति तस्यार्थस्य प

२

रूपेण तस्मिन्नप्रतिष्ठं [illegible] तस्यार्थस्य यत्पारमार्थिकं रूपं तन्न प्रतिभासयतीति यावत्" संशयोप्यतद्रूप
प्रतिष्ठत्वात् मिथ्याज्ञानं" स्थाणुर्वा पुरुषो वेति" विकल्पवृत्तिं व्याख्यातुमाह शब्दज्ञानानुपाती
वस्तुशून्यो विकल्पः" शब्दज्ञाने शब्दजनितज्ञाने तदनुपतितुं शीलमस्य शब्दज्ञानानुपाती" वस्तु
शून्यो वस्तुनमनपेक्षमाणो योध्यवसायः स विकल्प उच्यते" यथा पुरुषस्य चैतन्यं स्वरूपमिति अत्र दे
वदत्तस्य कंबल इति शब्दजनिते ज्ञाने षष्ठ्या योध्यवसितो भेदः तमिहाविद्यमानमपि समारोप्याध्य
वसायः प्रवर्तते वस्तुतस्तु चैतन्यमेव पुरुषः" निद्रां व्याख्यातुमाह अभावप्रत्ययालम्बना वृत्तिर्नि
द्रा" १० अभावप्रत्ययालम्बनं यस्या वृत्तेः सा तथोक्ता" एतदुक्तं भवति" या संततमसः समस्तवि
षयपरित्यागेन प्रवर्तते वृत्तिः सा निद्रा" अस्याश्च सुखमहमस्वाप्समिति स्मृतिदर्शनात् स्मृतेश्चानुभव
व्यतिरेकेणानुपपत्तेर्वृत्तित्वं" स्मृतिं व्याख्यातुमाह अनुभूतविषयासंप्रमोषः स्मृतिः" प्रमाणेना
नुभूतस्य विषयस्य योयमसंप्रमोषः संस्काररूपाद्द्वारादुद्बुद्धानुपारोहः सा स्मृतिः तत्र प्रमाणविप
र्ययविकल्पा जाग्रदवस्था स एव यदानुभववेलाप्रत्यक्षा प्रमाणाः स्वप्नः निद्रा त्वसंवेद्यमा
नविषया स्मृतिश्च प्रमाणविपर्ययविकल्पनिद्रानिमित्ता" एवं वृत्तीर्व्याख्याय सोपायं निरोधं व्या
ख्यातुमाह अभ्यासवैराग्याभ्यां तन्निरोधः" १२ अभ्यासवैराग्ये वक्ष्यमाणलक्षणे" ताभ्यां प्र
काशप्रवृत्तिनियमनरूपाणां चित्तवृत्तीनां यत्वोतिहननं स निरोधः" किमुक्तं भवति" तासां
निवृत्तिर्बाह्याभिनिवेशानामन्तर्मुखतया स्वकारणे एव चित्ते चितिशक्तिरूपतयावस्था
नं तत्र विषयदोषदर्शनजेन वैराग्येन बहिर्मुखता प्रतिबध्यते" अभ्यासेन च सुखजनकशान्त

प्रवाहः प्रदर्शितस्तदवरोधाय वैराग्येण सम्यक् निरुध्यते इत्युभयाधीनो भवति चित्तवृत्तिनिरोधः अभ्यासं व्याख्या
तुमाह तत्र स्थितौ यत्नोऽभ्यासः १३ वृत्तिरहितस्य चित्तस्य स्वरूपनिष्ठः परिणामः स्थितिः तस्यां यत्न उ
त्साहः पुनः पुनस्तथात्वेन चेतसि निवेशनमभ्यास इत्युच्यते तस्यैव विशेषमाह स तु दीर्घ
कालनैरन्तर्यसत्कारासेवितो दृढभूमिः १४ बहुकालं नैरन्तर्येण आदरातिशयेन च सेव्यमानो दृढ
भूमिः स्थिरो भवति दार्ढ्याय प्रभवतीत्यर्थः वैराग्यलक्षणमाह दृष्टानुश्रविकविषयवितृ
ष्णस्य वशीकारसंज्ञा वैराग्यं १५ द्विविधो विषयो दृष्ट आनुश्रविकश्च दृष्ट इहैवोपलभ्यमा
नः शब्दादिः देवलोकादावानुश्रविकः अनुश्रूयते गुरुमुखादित्यनुश्रवो वेदः तत आगतो ज्ञा
तो वा आनुश्रविकः तयोर्द्वयोरपि विषययोः परिणामविरसत्वदर्शनाद्विगततृष्णस्य या वशी
कारसंज्ञा ममैते वश्या नाहमेतेषां वश्य इति योऽयं विमर्शस्तद्वैराग्यमुच्यते तस्यैव विशेषमा
ह तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं १६ तद्वैराग्यं परं प्रकृष्टं प्रथमं वैराग्यं विषयविषयं द्वि
तीयं गुणविषयं उत्पन्नगुणपुरुषविवेकख्यातेरेव भवति निरोधसमाधे मे
रत्यन्तानुकूलत्वात् एवं योगस्य स्वरूपमुक्त्वा संप्रज्ञातासंप्रज्ञातभेदमाह वितर्कवि
चारानन्दास्मितानुगमात् संप्रज्ञातः १७ समाधिरिति शेषः सम्यक् संशयविपर्ययरहितत्वेन प्र
ज्ञायते प्रकर्षेण ज्ञायते भाव्यस्य स्वरूपं येन स संप्रज्ञातः समाधिर्भावनाविशेषः स वितर्का
दिभेदाच्चतुर्विधः सवितर्कः सविचारः सानन्दः सास्मितश्च भावना भाव्यस्य विषयान्तरपरिहा
रेण चेतसि पुनः पुनर्निवेशनं भाव्यं च द्विविधं ईश्वरस्तत्त्वानि तान्यपि च द्विविधानि जडाज

द्भेदात् जडानि चतुर्विंशतिः अजडः पुरुषः तत्र यदा महाभूतेंद्रियाणि स्थूलानि विषयत्वे
नादाय पूर्वापरानुसंधानेन शब्दार्थोल्लेखसंभेदेन च भावना प्रवर्तते तदा सवितर्कः समाधिः
अस्मिन्नेवालंबने पूर्वापरानुसंधानशब्दार्थोल्लेखशून्यत्वेन यदा भावना प्रवर्तते तदा निर्वि
तर्कः तन्मात्रांतःकरणलक्षणं सूक्ष्मं विषयमालंब्य तस्य देशकालधर्मावच्छेदेन यदा भाव
ना प्रवर्तते तदा सविचारः तस्मिन्नेवालंबने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वे
न भावना क्रियमाणा निर्विचार इत्युच्यते एवंपर्यंतः समाधिर्ग्राह्यसमापत्तिरिति व्यपदिश्यते
यदा तु रजस्तमोलेशानुविद्धमंतःकरणसत्वं भाव्यते तदा गुणभावाच्चितिशक्तेः सुखप्रकाश
मयस्य सत्वस्य भाव्यमानस्योद्रेकात् सानंदः समाधिर्भवति अस्मिन्नेव समाधौ ये बद्धधृतयस्त
त्वांतरं प्रधानपुरुषरूपं न पश्यंति ते विगतदेहाहंकारत्वाद्विदेहशब्दवाच्याः इयं ग्रहणसमाप
त्तिः ततः परं रजस्तमोलेशानभिभूतं शुद्धं सत्वमालंबनीकृत्य या प्रवर्तते भावना तस्यां ग्राह्य
स्य सत्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकात् सत्तामात्रावशेषत्वेन समाधिः सास्मित इत्युच्यते न चा
हंकारास्मितयोरभेदः शंकनीयः यतो यत्रांतःकरणमहमित्युल्लेखेन विषयान्वेदयते सोहंका
रः यत्रांतर्मुखतया प्रतिलोमपरिणामेन प्रकृतिलीने चेतसि सत्तामात्रमवभाति सास्मिता अ
स्मिन्नेव समाधौ ये कृतपरितोषाः परं परमात्मानं पुरुषं न पश्यंति तेषां चेतसि स्वकारणे ली
नतामुपगते प्रकृतिलया इत्युच्यंते ये परं पुरुषं ज्ञात्वा भावनायां प्रवर्तंते तेषामियं विवेक।

२

स्वा[illegible]ति र्दिहित[illegible]मीया त्तार स्य त्यात तत्र सवितर्के समाधौ चतस्रोऽप्यवस्थाः शक्तिरूपतया
वितर्के तेतत्र एकैकस्य रूपाग्रहणात् इति चतुरवस्थोऽयं संप्रज्ञातः समाधिः ॥ असंप्रज्ञात
माह ॥ विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ॥ विरम्यतेऽनेनेति विरामः ॥ वितर्कादि
चिंतात्यागः विरामश्चासौ प्रत्ययश्च विरामप्रत्ययः ॥ तस्याभ्यासः पौनःपुन्येन चेतसि वि
निवेशनं ॥ तत्र या काचिद् वृत्तिरुल्लसति तस्यां नेति नेतीति नैरंतर्येण पर्युदसनं तत्पूर्वकः संप्र
ज्ञातसमाधेः संस्कारशेषोऽन्यः तद्विलक्षणः असंप्रज्ञात इत्यर्थः ॥ न [illegible] किंचिद्वेद्यं संप्रज्ञायते
[illegible] निर्बीजः समाधिः ॥ इह चतुर्विधश्चित्तस्य परिणामः व्युत्थानं समाधिप्रारं
भः एकाग्रता निरुद्धता पर्यंतभूमी वृत्तिपरिणामं चे संस्काराः ॥ तत्र व्युत्थानजनिताः संस्काराः
समाधिप्रारंभजैः संस्कारैर्हन्यंते ॥ यथा सुवर्णसंवलितं ध्मायमानं सीसकमात्मानं सुव
र्णमलं च निर्दहति एवमेकाग्रताजनितान् संस्कारान्निरोधजाः स्वात्मानं च निर्दहंति ॥ तदे
वं योगस्य स्वरूपं भेदं संक्षेपेणोपायं चाभिधाय विस्तरेण योगाभ्यास शुद्धदर्शनपूर्वकम
पक्रमते ॥ भवप्रत्ययो विदेहप्रकृतिलयानां ॥ विदेहाः प्रकृतिलयाश्च वितर्कादिभूमिकाम्
त्रेव्याख्याताः तेषां समाधिर्भवप्रत्ययः ॥ भवः संसारः स एव प्रत्ययः कारणं यस्य स भवप्रत्ययः विवेकः ॥ तत्र श्र
द्धावतो वीर्यं जायते ॥ योगविषये उत्साहवान्भवति ॥ सोत्साहस्य पाश्चात्यासु भूमिषु स्मृतिरुत्पजायते
तत्स्मरणाच्च चेतः समाधियते ॥ समाहितचित्तश्च भाव्यं सम्यग्विजानाति ॥ एते संप्रज्ञातसमाधेरुपा

२

यः" अयमर्थः आविर्भूतमात्र एव संसारे ते तथाविधसमाधिभाजो भवंति तेषां परतत्वादर्शना
न्नायं योगाभ्यासो यं" अतः परतत्वज्ञाने तद्भावनायां च मुमुक्षुभिर्महान् यत्नो विधेय इत्येतदर्थमुपदिष्टं" तद
न्येषां तु" श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां" विदेहप्रकृतिलयव्यतिरिक्तानां योगि
नां श्रद्धादिपूर्वकः" श्रद्धादयः पूर्वे उपाया यस्य स श्रद्धादिपूर्वकः" ते च श्रद्धादयः क्रमादुपा
योपेयभावेन प्रवर्तमानाः संप्रज्ञातस्य समाधेरुपायतां प्रतिपद्यंते" तत्र श्रद्धा" योगविषये
चेतसः प्रसादः" वीर्यमुत्साहः" स्मृतिरनुभूतासंप्रमोषः" समाधिरेकाग्रता" प्रज्ञा ज्ञातव्यवि
वेकः" तत्र श्रद्धावतो वीर्यं जायते" योगविषये उत्साहवान् भवति" सोत्साहस्य चाश्चात्यासु भू
मिषु स्मृतिरुपजायते॥ तत्स्मरणाच्चेतः समाधीयते॥ समाहितचित्तश्च भाव्यं सम्यग्वि
जानाति" एते संप्रज्ञातसमाधेरुपायाः॥ तस्याभ्यासात्पराच्च वैराग्याद्भवत्यसंप्रज्ञातः" उक्तोपायवतां
योगिनामुपायभेदाद्भेदानाह॥ तीव्रसंवेगानामासन्नः२१ समाधिलाभो भवतीति शेषः" संवेगः क्रिया
हेतुर्दृढतरः संस्कारः स तीव्रो येषामधिमात्रोपायानां तेषामासन्नः समाधिलाभः॥ समाधिफलं चासन्नं भ
वति शीघ्रमेव निष्पद्यत इत्यर्थः॥ के ते तीव्रसंवेगा इत्यत आह मृदुमध्याधिमात्रत्वात्ततोपि विशेषः२२॥
तेभ्यः उपायेभ्यो मृद्वादिभेदभिन्नत्वादुपायवतां विशेषो भवति" मृदुमध्याधिमात्रा उपायभेदाः" ते प्रत्येकं
मृदुसंवेगमध्यसंवेगतीव्रसंवेगभेदात्त्रिविधाः" तद्भेदेन च नव योगिनो भवंति" मृदूपायो मृदुसंवेगः
मध्यसंवेगस्तीव्रसंवेगश्च" मध्योपायो मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेगश्च" अधिमात्रोपायो मृदुसं
वेगो मध्यसंवेगस्तीव्रसंवेगश्च" अधिमात्रोपाये तीव्रे च संवेगे महान्यत्नः कर्तव्य इति भेदोपदेशः" इ
दानीमेतदुपायाविलक्षणं सुगममुपायांतरमाह ईश्वरप्रणिधानाद्वा २३॥ ईश्वरो वक्ष्यमाणलक्ष

णः प्रणिधानं तस्मात्। विशेषः" विशिष्टमुपासनं सर्वक्रियाणामपि तत्रार्पणं॥ विषयसुखादिफल
मनिच्छन्सर्वाः क्रियास्तस्मिन्परमगुरावर्पयति तत्प्रणिधानं" समाधेस्तत्फलस्य लाभस्य च प्रकृष्ट उपा
यः" ईश्वरस्य प्रणिधानात् समाधिलाभ इत्युक्तं" तत्रेश्वरस्य स्वरूपं प्रमाणं प्रभाववाचकमुपासनाक्रमं
तत्फलं च क्रमेणाह" क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः २४॥ क्लिश्नंती
ति क्लेशाः" अविद्यादयो वक्ष्यमाणाः" विहितप्रतिषिद्धमिश्ररूपाणि कर्माणि" विपच्यंत इति
विपाकाः" कर्मफलानि जात्यायुर्भोगाः" आफलविपाकाच्चित्तभूमौ शेरत इत्याशयाः" वासनाख्याः
संस्काराः तैरपरामृष्टः त्रिष्वपि कालेषु न संस्पृष्टः पुरुषविशेषः" अन्येभ्यः पुरुषेभ्यो विशिष्यत इति वि
शेषः ईश्वरः ईशनशीलः इच्छामात्रेण सकलजगदुद्धरणक्षमः यद्यपि सर्वेषामात्मनां क्लेशादिस्पर्शो
नास्ति" तथापि चित्तगतस्तेषामुपदिश्यते" यथा योद्धृगतौ जयपराजयौ स्वामिनः" अस्य तु त्रिष्वपि का
लेषु तथाविधोऽपि क्लेशादिपरामर्शो नास्ति" अतः स विलक्षण एव भगवानीश्वरः" तस्य च तथाविधमैश्व
र्यमनादेः सत्त्वोत्कर्षात्" सत्त्वोत्कर्षश्च प्रकृष्टज्ञानादेव" न चानयोर्ज्ञानैश्वर्ययोरितरेतराश्रयत्वं
परस्परानपेक्षत्वात्" ते द्वे ज्ञानैश्वर्ये ईश्वरसत्त्वे वर्तमाने अनादिभूते" तेन च तथाविधेन सत्त्वेन तस्याना
दिरेव संबंधः" प्रकृतिपुरुषसंयोगवियोगयोरीश्वरेच्छाव्यतिरेकेणानुपपत्तेः" यथेतरेषां प्राणिनां
सुखदुःखमोहतया परिणतं चित्तं निर्मले सात्त्विके धर्मात्मप्रख्ये प्रतिसंक्रांतं चिच्छायासंक्रांतेः संवे
द्यं भवति नैवमीश्वरस्य तस्य केवल एव सात्त्विकः परिणाम उत्कर्षवाननादिसंबंधेन भोग्यत
या व्यवस्थितः अतः पुरुषांतरविलक्षणतया स एवेश्वरः" मुक्तात्मनां पुनः क्लेशादियोगस्तैस्तैः

शास्त्रोक्तैरुपायैर्निवर्तितः अस्य पुनः सर्वदैव तथात्वान्न मुक्तात्मतुल्यत्वं" न चेश्वराणामनेकत्वं
तेषां तुल्यत्वे भिन्नाभिप्रायत्वात् कार्यस्यैवानुपपत्तेः" उत्कर्षापकर्षत्वेन परावरत्वे यः प्रकृष्टः स एवेश्वरः
त्वा तत्रैव काष्ठाप्राप्तैश्वर्यस्य" एवमीश्वरस्य स्वरूपमभिधाय प्रमाणमाह" तत्र निरतिशयं सर्वज्ञ
वीजं २० तस्मिन्भगवति सर्वज्ञत्वस्य यद्बीजं अतीतानागतादिग्रहणस्याल्पत्वं महत्त्वं च तन्मूल
त्वाद्बीजमिव वीजं तत्तत्र निरतिशयं काष्ठा प्राप्तं दृष्टा ह्यल्पत्वमहत्त्वादीनां धर्माणां सातिशयानां
काष्ठाप्राप्तिः यथा परमाणावल्पत्वस्याकाशे परममहत्त्वस्य" एवं ज्ञानादयोपि चित्तधर्मास्तारतम्ये
न परिदृश्यमानाः क्वचिन्निरतिशयतामासादयंति" यत्र चैते निरतिशयाः संभवंति" तथापि शास्त्राद
स्य सर्वज्ञत्वादयो विशेषाऽवगंतव्याः" तस्य स्वप्रयोजनाभावे कथं प्रकृतिपुरुषयोः संयोजवियोग
य वापादयतीति नाशंकनीयं" तस्य कारुणिकत्वाद्भूतानुग्रह एव प्रयोजनं" कल्पप्रलयमहाप्रलयेषु निः
शेषान्संसारिणो उद्धरिष्यामीति तस्याध्यवसायः यद्यप्यस्येष्टं न तस्य प्रयोजनं" एवमीश्वरस्य प्रमाण
मभिधाय प्रभावमाह" स पूर्वेषामपि गुरुः कालेनानवच्छेदात्" आद्यानां स्रष्टॄणां ब्रह्मादीनामपि स गुरु
रुपदेष्टा" यतः कालेनानवच्छिद्यते" अनादित्वात्" तेषां पुनरादिमत्त्वादस्ति कालेनावच्छेदः" एवं प्रभाव
मुक्त्वा तस्योपयोगाय वाचकमाह" तस्य वाचकः प्रणवः २१ इत्थमुक्तस्वरूपस्येश्वरस्य वाचकोऽभि
धायकः प्रणवः" ओंकारः प्रकर्षेण नूयतेऽनेनेति नौति स्तौतीति वा" तयोर्वाच्यवाचकभावलक्ष
णः संबंधो नित्यः" संकेतेन प्रकाश्यते न तु केनचित्क्रियते" यथा पितापुत्रयोर्विद्यमानः संबंधोऽस्यायं पि
ताऽस्यायं पुत्र इति" केनचित्प्रकाश्यते" उपासनामाह" तज्जपस्तदर्थभावनं २२" तस्य सार्द्धत्रिमात्रस्य १

स ईश्वरः यद्यपि समान्यमात्रेऽहमात्रस्य पर्यवसितत्वान्न विशेषावगतिः २

प्रणवस्य जपो यथावदुच्चारणं" तद्वाच्यस्य चेश्वरस्य भावनं पुनः पुनश्चेतसि विनिवेशनं॥ एकाग्रताया
उपायः" अतः समाधिसिद्धये योगिनां प्रणवो जप्यं" स्तदर्थश्च भावनीय इत्युक्तं भवति" उपासनायाः फ
लमाह ततः प्रत्यक्चेतनाधिगमोप्यंतरायाभावश्च २९" तस्माज्जपात्तदर्थभावनाच्च योगिनः प्रत्य
क्चेतनाधिगमो भवति" विषयप्रतिकूल्येन स्वांतःकरणाभिमुखमंचति या चेतना दृक्शक्तिः सा प्र
त्यक्चेतना" तस्याधिगमो ज्ञानं भवति॥ अंतराया वक्ष्यमाणास्तेषामभावः॥ शक्तिप्रतिबंधो भवति॥ अ
थ केते ऽंतराय इत्याशंकायामाह॥ व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रांतिदर्शनालब्धभूमिकत्वा
नवस्थितत्वानि चित्तविक्षेपास्तेंतरयाः ३०॥ नवैते रजस्तमोबलात्प्रवर्तमानाश्चित्तस्य विक्षेपा भवंति॥ तै
रेकाग्रताविरोधिभिश्चित्तं विक्षिप्यते इत्यर्थः॥ तत्र व्याधिर्धातुवैषम्यनिमित्तो ज्वरादिः" स्त्यानमकर्म
ण्यता चित्तस्य" उभयकोट्यावलंबनं संशयः" योगं स्यान्नवेति" प्रमादोऽनवधानशीलता" समाधिसाधने ध
ष्वौदासीन्यं॥ आलस्यं कायचित्तयो गुरुत्वं" योगविषयऽप्रवृत्तिभावहेतुः" अविरतिश्चित्तस्य विषयसं
प्रयोगात्मा गर्धः" भ्रांतिदर्शनं शुक्तिकायां रजतवद्विपर्ययज्ञानं" अलब्धभूमिकत्वं कुतश्चिन्निमित्तात्समा
धिभूमेरलाभः अप्रसंप्राप्तिः अनवस्थितत्वं लब्धायामपि समाधिभूमौ चित्तस्य तत्राप्रतिष्ठा" त एव स
माधेरेकाग्रतायाश्च यथायोगं प्रतिपक्षत्वादंतराया इत्युच्यंते" चित्तविक्षेपकारकानन्यानंतरायान्प्रति
पादयितुमाह॥ दुःखदौर्मनस्यांगमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः ३१॥ कुतश्चिन्निमित्तादुत्पन्ने
षु विक्षेपेषु एते दुःखादयः प्रवर्तंते" तत्र दुःखं चित्तस्य राजसः परिणामो बाधनालक्षणः" यद्बाधात्प्रा
णिनस्तदपघाताय प्रवर्तंते" दौर्मनस्यं बाह्याभ्यंतरैः कारणैर्मनसो दौस्थ्यं" अंगमेजयत्वं सर्वांगीणो
वेपथुः आसनमनस्य स्थैर्यस्य बाधकः" प्राणो यद्बाह्यं वायुमाचामति स श्वासः" यत्कोष्ठ्यं वायुं निःश्वसिति
स प्रश्वासः ते एते च विक्षेपैः सह प्रवर्तमाना यथोदिताभ्यासवैराग्याभ्यां निरोद्धव्या" इत्येषामुपदेशः

सोपद्रवप्रतिषेधार्थमुपायमाह॥ तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ३२॥ तेषां विक्षेपाणां प्रतिषेधा
र्थं एकस्मिन्कस्मिंश्चिदभिमते तत्त्वेऽभ्यासः पुनः पुनश्चेतसो विनिवेशनं कुर्यात् यद्बलात्प्रत्यु
दितायामेकाग्रतायां विक्षेपाः प्रशममुपयान्ति॥ इदानीं चित्तसंस्कारापादकं परिकर्मकथ
नमुपायांतरमाह॥ मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावना
तश्चित्तप्रसादनं॥ मैत्री सौहार्दं करुणा कृपा मुदिता हर्षः उपेक्षौदासीन्यं एता यथाक्रमं सु
खितेषु दुःखितेषु पुण्यापुण्यवत्सु च विभावयेत् तथाहि सुखितेषु साध्वेषां सुखित्वमि
ति मैत्रीं कुर्यात् न त्वीर्ष्यां दुःखितेषु कथं नु नामैषां दुःखविमुक्तिः स्यादिति कृपामेव कुर्यात् न ता
टस्थ्यं पुण्यवत्सु पुण्यानुमोदनेन हर्षं कुर्यात् न तु किमेते पुण्यवन्त इति वि
द्वेषं अपुण्यवत्सु चौदासीन्यमेव भावयेन्नानुमोदनं न द्वेषं सूत्रे सुखदुःखादिशब्दैस्तद्वन्तः प्रतिपादिताः
तदेवं मैत्र्यादिपरिकर्मणा प्रसादेनोपायेन चित्ते प्रसीदति सुखेन समाधेराविर्भावो भवति परिकर्म
चैतद्बाह्यं कर्म यथा गणिते मिश्रकादिव्यवहार गणितनिष्पत्तये संकलनादिकर्मोपकारकत्वेन प्र
धानकर्मनिष्पत्तये प्रभवति एवं द्वेषरागादिप्रतिपक्षभूतमैत्र्यादिभावनया समुत्पादितप्रसादं चि
त्तं संप्रज्ञातादिसमाधियोग्यं संपद्यते रागद्वेषावेव मुख्यतया विक्षेपमुत्पादयतः तौ चेत्समूलमुन्मू
लितौ स्यातां तदा प्रसन्नत्वान्मनसो भवत्येवैकाग्रता उपायांतरमाह॥ प्रच्छर्दनविधारणाभ्यां
वा प्राणस्य ३४॥ प्रच्छर्दनं कोष्ठ्यस्य वायोः प्रयत्नविशेषान्मात्राप्रमाणेन वहिर्निःसारणं विधा
रणं मात्राप्रमाणेनैव प्राणस्य यामो गतिविच्छेदः स च द्वाभ्यां प्रकाराभ्यां बाह्याभ्यंतरापूरणेन पूरि
तस्य वा तत्रैव निरोधेन तदेवं रेचकपूरककुंभकभेदेन त्रिविधः प्राणायामश्चित्तस्य स्थितिमेका

७

जतयातिवध्नाति" सर्वासामिंद्रियवृत्तीनां प्राणवृत्तिपूर्वकत्वान्मनःप्राणयोश्च व्यापारे परस्पर
मेकयोगक्षेमत्वाज्जीयमानः प्राणाः समस्तेंद्रियवृत्तिनिरोधद्वारेण चित्तस्यैकाग्रतायां प्रभव
ति" समस्तदोषक्षयकारित्वं चास्यागमे श्रूयते" दोषकृताश्च सर्वाविक्षेपवृत्तयः अतो दोषनिर्हरण
7 द्वारेणाप्यस्यैकाग्रतायां सामर्थ्यं" इदानीमुपायांतरदर्शनोपक्षेपेण संप्रज्ञातस्य समाधेः पूर्वांग
ंकरोति॥ विषयवती प्रवृत्तिरुत्पन्ना स्थितिनिबंधनी मनस इति वाक्यशेषः॥ विषया गंधरस
रूपस्पर्शशब्दा" स्ते विद्यंते फलत्वेन यस्यां सा विषयवती प्रवृत्तिर्मनसः स्थैर्यं करोति" तथाहि ना
साग्रे चित्तं धारयतो दिव्यगंधसंविदुपजायते" तादृश्येव जिह्वाग्रे चित्तं धारयतो रससंवित्" तालु
न्येरूपसंवि। जिह्वामध्ये स्पर्शसंवित्" जिह्वामूले शब्दसंवित्" तदेवं तत्तदिंद्रियद्वारेण तस्मिंस्तस्मिन्दि
व्यविषये जायमाना संवित् चित्तस्यैकाग्रताया हेतुर्भवति" अस्ति योगस्य फलमिति योगिनः समा
श्वासोत्पादनात्" एवंविधमेवोपायांतरमाह" विशोका वा ज्योतिष्मती" प्रवृत्तिरुत्पन्ना चित्तस्य स्थिति
निबंधनीति वाक्यशेषः" ज्योतिः शब्देन सात्विकः प्रकाश उच्यते" सप्रकाशोस्यामतिशयवांश्च विद्य
ते यस्यां सा ज्योतिष्मती प्रवृत्तिः" विशोका विगतः सुखमयसत्वाभ्यासवशात् शोको रजःपरिणा
मरूपो यस्यां सा विशोका चेतसः" स्थितिनिबंधनी" अयमर्थः हृत्पद्मसंपुटमध्ये प्रशांतकल्लोल
क्षीरोदधिप्रख्यं चित्तसत्वं भावयतः प्रज्ञालोकात्सर्ववृत्तिपरिक्षये चेतसः स्थैर्यमुत्पद्यते" उपायांतर
प्रदर्शनद्वारेण संप्रज्ञातस्य समाधेर्विषयं दर्शयति" वीतरागविषयं वा चित्तं ३७॥ मनसः स्थितिनिबं
धनं भवतीति वाक्यशेषः॥ वीतरागः परित्यक्तविषयाभिलाषः" तस्य यच्चित्तं परिहृतक्लेशं तदालंब
नीकृतं चेतसः स्थितिहेतुर्भवति" एवंविधमेवोपायांतरमाह॥ स्वप्ननिद्राज्ञानालंबनं वा॥ प्रस्व

[illegible]

स्निमित्तं वा हृदयकमले मनो भावयेद्वा यत्र भोक्तृत्वमात्मनः स्वस्वप्नः निद्रामिवोक्तलक्षणां" त
दा सलंबनं स्वप्नावलंबनं निद्रालंबनं वा ज्ञानमालंब्यमानं चेतसः स्थितिं करोति" नानारुचित्वा१
त्प्राणिनां यस्मिन्कस्मिंश्चिद्वस्तुनि योगिनः श्रद्धा भवति" तस्य ध्यानेनापि भवतीष्टसिद्धिरिति प्रति
पादयन्नाह॥ यथाभिमतध्यानाद्वा ३९ यथाभिप्रेतवस्तुनि बाह्ये चंद्रादा वाभ्यंतरे नाडीचक्रादौ१
वा भाव्यमानं चेतः स्थिरीभवति" एवमुपायान्प्रदर्श्य फलप्रदर्शनार्थमाह" परमाणुपरममह
त्त्वांतोऽस्य वशीकार" एतैरुपायैश्चित्तस्य स्थैर्यं भावयतो योगिनः सूक्ष्मविषयभावनाद्वारेण
परमाण्वंतो वशीकारोऽप्रतीघातरूपो जायते" क्वचित्परमाणुरूपे सूक्ष्मविषयेऽस्य मनो न प्रति
हन्यत इत्यर्थः एवं स्थूलमाकाशादिपरममहत्पर्यंतं भावयतो न क्वचिच्चेतसः प्रतीघात उत्पद्य
ते" सर्वत्र स्वातंत्र्यं भवतीत्यर्थः" एवमेभिरुपायैः संस्कृतस्य चेतसः कीदृग्रूपं भवतीत्याह" क्षीण१
वृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदंजनता समापत्तिः ४१" क्षीणावृत्तिर्यो
यस्य तत्क्षीणावृत्तिस्तस्य ग्रहीतृग्रहणग्राह्येषु आत्मेंद्रियविषयेषु तत्स्थतदंजनता समा
पत्तिर्भवति" तत्स्थत्वं तत्रैकाग्रता तदंजनत्वं तन्मयत्वं" न्यग्भूते चित्ते विषयस्य भाव्यमानस्यैवोत्क
र्षे [illegible] तथाविधा समापत्तिस्तद्रूपतापरिणामो भवतीत्यर्थः दृष्टान्तमाह॥ अभिजातस्येव मणेर्यथाऽ
भिजातस्य निर्मलस्य स्फटिकमणेस्तद्रूपाश्रयवशात्तद्रूपतापत्तिरेवं निर्मलस्य चित्तसत्त्वस्य तत्तद्भा
वनापदवस्तूपरागात्तद्रूपतापत्तिः" यद्यपि ग्रहीतृग्रहणग्राह्येषु इत्युक्तं" तथापि भूमिकाक्रमवशा
द्ग्राह्यग्रहणनिष्ठः ततोऽस्मितामात्रग्रहीतृष्विति बोध्यं" यतः प्रथमं ग्राह्यनिष्ठ एव समाधिः ततो
ग्रहणनिष्ठः ततोऽस्मितामात्ररूपो ग्रहीतृनिष्ठः केवलस्य पुरुषस्य ग्रहीतुर्भाव्यतासंभवात्तत्र स्थू
लसूक्ष्मग्राह्योपरक्तं चित्तं तत्र समापन्नं भवति" एवं ग्रहणे ग्रहीतरि च समापन्नं तद्रूपपरिणामत्वं१

वोपयत्वं इदानीं एकाग्रायाः एव समापत्तेः चातुर्विध्यं इदमाह" शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का
समापत्तिः" श्रोत्रेन्द्रियग्राह्यः स्फोटरूपो वा शब्दः" अर्थो जात्यादिः ज्ञानं सत्वप्रधाना बुद्धिवृत्तिः" विकल्प
उक्तलक्षणाः" तैः संकीर्णा यस्यां विकल्परूपेणामेते शब्दादयः परस्पराध्यासेन विकल्परूपेण प्रतिभा
सन्ते" गौरिति शब्दः गौरित्यर्थः गौरिति ज्ञानमित्यनेनाकारेण सा सवितर्का समापत्तिरुच्यते" उक्त
लक्षणाविपरीतां निर्वितर्कामाह" स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का॥४३॥ श
ब्दार्थस्मृतिप्रविलये प्रत्युदितस्पष्टग्राह्याकारप्रतिभासितया न्यग्भूतज्ञानांशत्वेन स्वरूपशून्येव नि
र्वितर्का समापत्तिः" भेदांतरं प्रतिपादयितुमाह" एतयैव सवितर्कया निर्वितर्कया च समापत्त्या सविचा
रा निर्विचारा च समाख्याता" कीदृशी सूक्ष्मविषया सूक्ष्मतन्मात्रांतःकरणं विषयो यस्याः सा तथोक्ता"
एतेन च पूर्वस्याः स्थूलविषयत्वं प्रतिपादितं भवति" सा हि महाभूतेन्द्रियालंबना शब्दार्थविषयत्वेन शे
ब्दार्थज्ञानविकल्पसहितत्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मोऽर्थः प्रतिभाति यस्यां सा सविचारा"
देशकालधर्मादिरहितो धर्ममात्रतया सूक्ष्मोऽर्थस्तन्मात्रांतःकरणरूपः प्रतिभाति यस्यां सा निर्वि
चारा॥ अस्याश्चैव स्थूलविषयायाः किंपर्यंतः सूक्ष्मो विषय इत्याह सूक्ष्मविषयत्वं चालिंगपर्य
वसानं॥४५॥ सविचारनिर्विचारयोः समापत्त्योर्ये सूक्ष्मविषयत्वमुक्तं तदलिंगपर्यवसानं॥ न क्वचि
ल्लीयते॥ न वा किंचिल्लिंगति गमयतीत्यलिंगं॥ प्रधानं तत्पर्यंतं सूक्ष्मविषयत्वं॥ तथाहि गुणानां परि
णामे चत्वारि पर्वाणि विशिष्टलिंगमविशिष्टलिंगं लिंगमात्रं अलिंगं चेति॥ विशिष्टलिंगं भूता
नि" अविशिष्टलिंगं तन्मात्रेन्द्रियाणि" लिंगमात्रं बुद्धिः" अलिंगमात्रं प्रधानमिति" नातः परं सूक्ष्मम
स्तीत्युक्तं भवति॥ एतासां समापत्तीनां प्रकृते प्रयोजनमाह॥ ता एव सबीजः समाधिः॥४६॥ ता एवोक्त
लक्षणाः समापत्तयः सबीजः सह बीजेन आलंबनेन वर्त्तत इति॥ सबीजः संप्रज्ञातः समाधिरु
च्यते॥ सर्वासां सालंबनत्वात्॥ अथेतरासां समापत्तीनां निर्विचारफलकत्वान्निर्विचारायाः फलमाह

निर्विचारवैशारद्येऽध्यात्मप्रसादः ४७॥ निर्विचारत्वं व्याख्यातं वैशारद्यं नैर्मल्यं सवितर्कां स्थूलविष
यामपेक्ष्य निर्वितर्कायाः प्राधान्यं॥ ततोऽपि सूक्ष्मविषयायाः सविचारायाः ततोऽपि निर्विकल्पायाः
निर्विचारायाः तस्यास्तु निर्विचारायाः प्रकृष्टाभ्यासवशात् वैशारद्ये नैर्मल्ये सति अध्यात्मप्र
सादः अध्यात्मप्रसादः समुपजायते" येकृष्टं योगं प्राप्नोति चित्तं क्लेशवासनादिरहितं स्थिरप्रवाहयो
ग्यं भवति एतदेव चित्तस्य वैशारद्यं यदुस्थितौ दार्ढ्यं" तस्मिन्सति किं भवतीत्याह॥ ऋतंभरा तत्र प्रज्ञा ४८
ऋतं सत्यं बिभर्ति कदाचिदपि न विपर्ययेणाच्छाद्यते" सा ऋतंभरा प्रज्ञा तस्मिन्सति भवतीत्यर्थः तस्मा
त्तत्र प्रज्ञालोकात्सर्वं यथावत्पश्यन्योगी प्रकृष्टं योगं प्राप्नोति॥ अस्याः प्रज्ञान्तराद्वैलक्षण्यमाह॥ श्रो
तानुमानप्रज्ञाभ्यां सामान्यविषया विशेषार्थत्वात् ४९ श्रोतमागमज्ञानं॥ अनुमानमुक्तलक्षणं ता
भ्यां याजायते प्रज्ञा सा सामान्यविषया" नहि शब्दलिंगयोरिन्द्रियवद्विशेषप्रतिपत्तौ सामर्थ्यं॥ इयं तु
निर्विचारवैशारद्यसमुद्भवा प्रज्ञा ताभ्यां विलक्षणा विशेषविषयत्वात्" अस्यां हि प्रज्ञायां सूक्ष्म
व्यवहितविप्रकृष्टानामपि विशेषः स्फुटेनैव रूपेणाभासते" अतस्तस्यामेव योगिना परः प्रयत्नः
कर्तव्य इत्युपदिष्टं भवति" अस्याः प्रज्ञायाः फलमाह" तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ५०॥
तया जनितो यः संस्कारः सोऽन्यान्संस्कारान् व्युत्थानजान्समाधिजांश्च संस्कारान्प्रतिबध्नाति
स्वकार्यकरणाक्षमान्करोतीत्यर्थः" यतस्तत्त्वरूपतयाऽनया जनिताः संस्काराः निरालंबनत्वा
द तत्त्वरूप प्रज्ञाजनितान्संस्कारान्बाधितुं शक्नुवंति" अतस्तामेव प्रज्ञामभ्यसेदित्युक्तं भवति॥
एवं संप्रज्ञातं समाधिमभिधायासंप्रज्ञातं वक्तुमाह॥ तस्यापि निरोधे सर्वनिरोधान्निर्बीजः स
माधिः ५१॥ तस्य संप्रज्ञातस्य निरोधे प्रविलये सति सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयात्

वाक्यः केवलसंस्कारमात्रावृत्तिरूपतेति तस्यां तस्यां नेति नेति पर्युदसनान्निर्बीजः समाधिरा
विर्भवति" यस्मिन्सति पुरुषः स्वरूपमात्रावस्थितः शुद्धो भवति" तदत्राधिकृतस्य योगस्य लक्षणं
चित्तवृत्तिनिरोधपदानां च व्याख्यानं" अभ्यासवैराग्यलक्षणस्योपायद्वयस्य स्वरूपं भेदं
चाभिधाय संप्रज्ञातासंप्रज्ञातभेदेन योगस्य मुख्यामुख्यभेदमुक्त्वा योगाभ्यासप्रदर्शनपूर्वको
न विस्तरेणोपायान्प्रदर्श्य सुगमोपायप्रदर्शनपरतया ईश्वरस्य स्वरूपप्रमाणप्रभाववाचको
पासनाक्रमतत्फलानि निर्णीय चित्तविक्षेपान्तत्सहभुवश्च दुःखादीन्विस्तरेण च तत्प्रतिषेधो
पायानेकतत्वाभ्यासमैत्र्यादि प्राणायामादीन संप्रज्ञातासंप्रज्ञातपूर्वमङ्गभूत विषयवतीप्रवृत्ती
प्रवृत्तिप्रभृतीनाख्यायोपसंहारद्वारेण च समापत्तीः सलक्षणाः फलसहिताः स्वस्वविषयस
हिताश्चोक्त्वा संप्रज्ञातासंप्रज्ञातयोरुपसंहारमभिधाय सबीजपूर्वको निर्बीजः समाधिरभि
हित इति व्याकृतो योगपादः॥ १॥ इति श्रीमहाराजाधिराजभोजदेवविरचितायां पातंजलयो
गशास्त्रसूत्रवृत्तौ प्रथमः पादः समाप्तः॥ १॥ तेन दुःप्राप्ययोगर्द्धिसिद्धये येन दर्शिताः उपायाः सज
जल्पस्याक्षो स्तु प्रार्थिताप्तये १" तदेवं प्रथमे पादे समाहितचित्तस्य सोपायं योगमभिधाय"
व्युत्थितचित्तस्यापि कथमुपायाभ्याससपूर्वको योगः सा[illegible]स्मनुपयातीति तत्साधनानुष्ठान
प्रतिपादनाय क्रियायोगमाह॥ तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः १ तपः शास्त्रांतरो
पदिष्टं कृच्छ्रचान्द्रायणादि" स्वाध्यायः प्रणवपूर्वाणां मंत्राणां जपः ईश्वरप्रणिधानं सर्वक्रिया
णां तस्मिन्परमगुरौ फलनिरपेक्षतया समर्पणं एतानि क्रियायोग इत्युच्यते" स किमर्थ इत्याह॥
समाधिभावनार्थः क्लेशतनूकरणार्थश्च॥ २॥ क्लेशा वक्ष्यमाणास्तेषां तनूकरणं" स्वकार्यक

रणप्रतिबंधः॥ समाधिरुक्तलक्षणस्तस्य भावना चेतसि पुनः पुनर्निवेशनं सोऽर्थः प्रयोजनं यस्य वि
स तथोक्तः॥ एतदुक्तं भवति॥ एते तपःप्रभृतयोऽभ्यस्यमानाश्चित्तगतानविद्यादीन् क्लेशान्
शिथिलीकुर्वंतः समाधेरुपकारकतां भजंते॥ तस्मात्प्रथमतः क्रियायोगविधानपरेण योगिना भ-
वितव्यमित्युपदिष्टं॥ क्लेशतनूकरणार्थ इत्युक्तं तत्र के ते क्लेशा इत्याह॥ अविद्यास्मितारागद्वेषाभि-
निवेशाः क्लेशाः॥ ३ क्लेशा अविद्यादयो वक्ष्यमाणलक्षणाः पंच ते च बाधनालक्षणं परितापमुप-
जनयंतः॥ क्लेशशब्दवाच्या भवंति ते हि चेतसि प्रवर्तमानाः संस्कारलक्षणं गुणपरिणामं द्रढयंति वि
सत्स्वपि सर्वेषां तुल्ये क्लेशत्वे मूलभूतत्वादविद्यायाः प्राधान्यं प्रतिपादयितुमाह॥ अविद्या क्षेत्रमुत्तरे-
षां प्रसुप्ततनुविच्छिन्नोदाराणां ४॥ अविद्या मोहः॥ अनात्मन्यात्माभिमान इति यावत्॥ सा क्षेत्रं प्र-
सवभूमिरुत्तरेषामस्मितादीनां॥ प्रत्येकं प्रसुप्तादिभेदेन चतुर्विधानां॥ अतो यत्राविद्या विपर्ययज्ञा-
नरूपा शिथिली भवति॥ तत्र क्लेशानां नोद्भवो दृश्यते॥ विपर्ययज्ञानसद्भावे च तेषामुद्भवदर्शनात्
स्थितमेव मूलत्वमविद्यायाः॥ प्रसुप्ततनुविच्छिन्नोदाराणामिति॥ तत्र ये क्लेशाश्चित्तभूमौ स्थिताः प्रबो-
धकाभावे स्वकार्यं नारभंते ते प्रसुप्ता इत्युच्यंते॥ यथा बाल्यावस्थायां बालस्य हि वासनारूपेण स्थिता
अपि क्लेशाः प्रबोधकसहकारिणामभावेनाभिव्यज्यंते॥ ते तनवो ये स्वस्वप्रतिपक्षभावनया शिथिलीकृत-
कार्यसंपादनशक्तयो वासनावशेषतया चेतस्यवस्थिताः॥ प्रभूतां सामग्रीमंतरेण स्वकार्यमारब्धुं
क्षमाः॥ यथाभ्यासवतो योगिनः॥ ते विच्छिन्ना ये केनचिद्बलवता क्लेशेनाभिभूतशक्तयस्तिष्ठंति॥ यथा
द्वेषावस्थायां द्वेषः॥ न ह्यनयोः परस्परविरुद्धयोर्युगपत्संभवोऽस्ति॥ ते उदाराः ये प्राप्तसहकारिसन्निधयः स्वं
स्वं कार्यमभिनिर्वर्तयंति॥ यथा सर्वदैव योगपरिपंथिनो व्युत्थानदशायां॥ एतेषां प्रत्येकं चतुर्विधानाम

पि मूलभूतत्वेन स्थिताप्यविद्या ऽन्वयित्वेन प्रतीयते" नहि क्वचिदपि क्लेशानां विपर्ययान्वय-
निरपेक्षाणां स्वरूपमुपलभ्यते॥ तस्यां च मिथ्याज्ञानरूपायां सम्यक्ज्ञानेन निवर्त्तितायां दग्धबीज-
कल्पानामेषां न क्वचित्प्ररोहोस्तीति" अविद्यानिमित्तत्वमविद्यान्वयश्चैषां निश्चीयते॥ अतः सर्वे
प्यविद्याव्यपदेशभाजः सर्वेषां च क्लेशानां चित्तविक्षेपकारित्वात्॥ योगिना प्रथममेव तदुच्छेदे य-
त्नः कर्त्तव्य इति॥ अविद्यायाः लक्षणमाह अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या
५॥ अतस्मिंस्तदिति प्रतिभासोऽविद्येत्यविद्यायाः सामान्यलक्षणं" तस्या एव भेदप्रतिपादनं॥ अ- पृ
घटादिषु नित्येषु नित्यत्वाभिमानोऽविद्येत्युच्यते" एवमशुचिषु कायादिषु शुचित्वाभिमानः॥ दुःखेषु च विषये-
षु सुखत्वाभिमानः॥ अनात्मनि शरीरे आत्मत्वाभिमानः" एतेनापुण्ये पुण्यभ्रमोऽनर्थे चार्थभ्रमो या
व्याख्यातः" अस्मितां लक्षयितुमाह॥ दृग्दर्शनशक्त्योरेकात्मतेवास्मिता॥६॥ दृक्शक्तिः पुरुषः दर्शन-
शक्ती रजस्तमोभ्यामनभिभूतः सात्त्विकः परिणामोऽन्तःकरणरूपः तयोर्भोग्यभोक्तृत्वेन जडाजडत्वे-
नात्यन्तं भिन्नरूपयोरेकताभिमानोऽस्मितेत्युच्यते॥ यथा प्रकृतिर्वस्तुतः कर्तृत्वभोक्तृत्वरहितापि क-
र्त्र्यहं भोक्त्र्यहमित्यभिमन्यते" सोयमस्मिताख्यो विपर्यासः क्लेशः॥ रागस्य लक्षणमाह॥ सुखानु-
शयी रागः॥७॥ सुखमनुशेत इति सुखानुशयी॥ सुखज्ञस्य सुखानुस्मृतिपूर्वकः सुखसाध-
नेषु तृष्णारूपो गर्द्धो रागसंज्ञः क्लेशः" द्वेषस्य लक्षणमाह॥ दुःखानुशयी द्वेषः॥८॥ दुःखप्रतिह-
तेर्लक्षणं॥ तदभिज्ञस्य दुःखानुस्मृतिपूर्वकं तत्साधनेष्वनभिलषतो योयं निंदात्मकः स द्वेषलक्ष-
णः क्लेशः॥ अभिनिवेशमाह॥ स्वरसवाही विदुषोपि तथारूढो [illegible] ऽभिनिवेशः॥९॥ पूर्वजन्मानु-
भूतमरणदुःखानुभववासनाबलाद्भयरूपः समुपजायमानः शरीरविषयादिभिर्मम वियोगो
माभूदित्यन्वहमनुबन्धरूपः सर्वस्याकृमेर्ब्रह्मपर्यन्तं निमित्तं विना प्रवर्तमानोऽभिनिवेशाख्यः

स्तु क्लेशाः॥ तदेवं कुशलस्य क्लेशात्मकत्वादेकांताभ्यासेन प्रथमं क्लेशाः परिहर्तव्याः॥ न चाज्ञाता
नां तेषां परिहारः कर्तुं शक्य इति तत्स्वरूपं तेषामुद्देशं क्षेत्रविभागं लक्षणं चाभिधाय स्थूल
सूक्ष्मभेदभिन्नानां तेषां परिहारोपायमाह॥ ते प्रतिप्रसवहेयाः सूक्ष्माः १०॥ ते सूक्ष्माः
क्लेशाः ये वासनारूपेणैव स्थिता न वृत्तिरूपं परिणाममारभंते प्रतिप्रसवेन प्रतिलोमपरिणा
मेन हेयास्त्याज्याः॥ स्वकारणास्मितायां कृतार्थं चित्तं यदा प्रविष्टं भवति॥ तदा कुत
स्तेषां निर्मूलानां संभवः॥ स्थूलानां हेयोपायमाह॥ ध्यानहेयास्तद्वृत्तयः॥ तेषां स्थूलानां क्लेशानां
प्रारब्धकार्याणां याः सुखदुःखमोहात्मिका वृत्तयस्ता ध्यानेनैव चित्तैकाग्रतालक्षणेनैव हेया हा
तव्या इत्यर्थः॥ चित्तपरिकर्माभ्यासमात्रेणैव स्थूलत्वात्तासां निवृत्तिर्भवति॥ यथा वस्त्रादेः
स्थूलो मलः प्रक्षालनमात्रेणैव निवर्तते यस्तत्र सूक्ष्मः स तैस्तैरुपायैरुत्तापनप्रभृतिभि
रेव निवर्तयितुं शक्यते॥ एवं क्लेशानां तत्त्वमभिधाय कर्माशयस्याभिधानमाह॥ क्लेशमू
लः कर्माशयो दृष्टादृष्टजन्मवेदनीयः॥१२ कर्माशय इत्यनेन तस्य स्वरूपमभिहितं॥ यतो वा
पुण्यापुण्यरूपो वा कर्माशयः क्लेशमूल इत्यनेन कारणमभिहितं॥ यतः कर्माशयं
~~[illegible]~~ सत्तारूपा विलिंपितं॥ दृष्टादृष्टजन्मवेदनीय इत्यनेन फलमुक्तं॥ अस्मिन्नेव जन्मनि
अनुभाव्यो क्लेशा एव निलिप्तं दृष्टजन्मवेदनीय इत्यर्थः॥ जन्मान्तरानुभवनीयोऽदृष्टजन्मवेदनीयः॥ तथाहि
न्यजन्मभवनीयोऽदृष्टजन्मवेदनीयः देवताराधनादीनि तीव्रसंवेगेन कृतानीहैव जन्मनि जा
कालेपि फलपाकानि कर्माणि॥ यथा नंदीश्वरस्य भगवन्महेश्वराराधनबलादिहै
वायुर्भोगलक्षणं फलं प्रयच्छंति॥ एवमन्येषामपि विश्वामित्रादीनां तपःप्रभावाज्जा
व जन्मनि जात्यायुषी विशिष्टे प्रादुर्भूते॥ यथा तीव्रसंवेगेन दुष्टकर्म कृतं नहुषादीनां जात्यंतरपरि
णामः केषांचिज्जातिरेव

वेदनीयः॥ तथाहि केषांचित्पुण्यानि कर्माणि देवतादि॥॥ परिणामः॥ उर्वश्या इव कार्तिकेयवने
लतारूपतया" एवं मस्तस्तमस्तत्वेन यथायोगं योज्यं॥ इदानीं कर्माशयस्य स्वभेदभिन्नं फलमा
सति मूले तद्विपाको जात्यायुर्भोगाः १३॥ मूलमुक्तलक्षणाः" क्लेशास्तेष्वनभिभूतेषु सत्सु कर्मा
णां कुशलाकुशलरूपाणां विपाकः फलं जात्यायुर्भोगा भवंति॥ जातिर्मनुष्यत्वादिः" आयुश्चिर
रकालं कायसंबंधः" भोगाः विषयाः" इंद्रियाणि सुखदुःखसंविच्च कर्मकरणभावसाध
नव्युत्पत्त्या भोगशब्दस्य इदमत्र तात्पर्यं चित्तभूमावनादिकालसंचिताः कर्मवासना" यथा
यथा पाकमुपयांति तथा तथा गुणप्रधानभावेन स्थिता जात्यायुर्भोगलक्षणं स्वकार्य
मारभंते॥ उक्तानां कर्मफलत्वेन जात्यादीनां स्वकारणकर्मानुसारेण कार्यकर्तृत्वमाह
ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् १४॥ ह्लादः सुखं परितापो दुःखमिति" ह्लादप
रितापौ फलं येषां ते तथोक्ताः पुण्यं कुशलं कर्म" तद्विपरीतमपुण्यं ते पुण्यापुण्यकारणा ये
षां तेषां भावस्तत्त्वं तस्मात्" एतदुक्तं भवति "पुण्यकर्मारब्धा जात्यायुर्भोगा ह्लादफलाः॥ अपु
ण्यकर्मारब्धाः परितापफलाः॥ एतच्च प्राणिमात्रापेक्षया द्वैविध्यं॥ योगिनस्तु सर्वं दुःख
मित्याह॥ परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः १५ परि
ज्ञातक्लेशादिविवेकस्य परिदृश्यमानं सकलमेव भोगसाधनं सस्वादु विषान्नवत् दुःखमे
व प्रतिकूलवेदनीयमेवेत्यर्थः॥ यस्मादत्यंताभिजातो योगी दुःखलेशेनाप्युद्विजते॥ यथाक्षि
पात्रमूर्णातंतुस्पर्शनमात्रेणैव महतीं पीडामनुभवति नेतरदंगं॥ तथा विवेकी स्वल्पदुःखाव
संबंधेनापि विरज्यते विरक्तो भवतीत्यर्थः कथमित्याह॥ परिणामतापसंस्कारदुःखैः विषयाणामु
पभुज्यमानानां यथायथं गर्द्धाभिवृद्धेः तदप्राप्तिकृतस्य दुःखस्यापरिहार्यत्वात् दुःखांतर

साधनत्वाच्चास्यैव दुःखरूपतेति॥ पारम्पर्येण दुःखत्वं उपभुज्यमानेषु सुखसाधनेषु तद्व
तिबंधिनं प्रति द्वेषस्य सर्वदैवावस्थितत्वात् सुखानुभवकालेपि तापदुःखं परिहर्तुमशक्यमि
ति तापदुःखता॥ संस्कारदुःखत्वं स्वाभिमतविषयसंनिधाने सुखसंविद्दुःखसंविच्चो
पजायमाना तथाविधमेव स्वक्षेत्रे संस्कारमारभंते॥ संस्काराश्च पुनस्तथाविधसंविद
नुभवः इत्यपरिमितसंस्कारोत्पत्तिद्वारेण संस्कारानुच्छेदात् सर्वस्यैव दुःखत्वं॥ गुण
वृत्तिविरोधाच्चेति १६ गुणानां सत्वरजस्तमसां या वृत्तयः सुखदुःखमोहरूपाः पर
स्परमभिभाव्याभिभावकत्वेन विरुद्धा जायंते॥ तासां च सर्वत्रैव दुःखानुवेधाद्दुःख
त्वं॥ एतदुक्तं भवति॥ ऐकांतिकीमात्यंतिकीं च दुःखनिवृत्तिमिच्छतो विवेकिन उक्तरू
पकारणचतुष्टयात् सर्वे विषया दुःखरूपाः प्रतिभांति॥ तस्मात्सर्वे कर्मविपाको दुः
खरूप एवेत्युक्तं भवति॥ तदेवमस्य क्लेशकर्माशयविपाकराशेरविद्याप्रभवत्वाद
विद्यायाश्च मिथ्याज्ञानरूपायाः सम्यग्ज्ञानोच्छेद्यत्वात्॥ सम्यग्ज्ञानस्य साधनस्य
हेयोपादेयावधारणरूप[illegible]त्वाद्धेयमाह॥ हेयं दुःखमनागतं १७ भूतस्य व्यतिक्रांतत्वा
दनुभूयमानस्य त्यक्तुमशक्यत्वादनागतमेव संस्कारदुःखं हातव्यमित्युक्तं भवति॥ हेय
हेतुमाह॥ द्रष्टृदृश्ययोः संयोगो हेयहेतुः १८ द्रष्टा चिद्रूपः पुरुषः दृश्यं बुद्धितत्वं तयो
विवेकख्यातिपूर्विका यासौ संयोगो भोग्यभोक्तृत्वेन संनिधानं स हेयस्य [illegible]

१२ दुःखस्य गुणपरिणामरूपस्य संसारस्य हेतुः कारणं तन्निवृत्त्या संसारनिवृत्तिर्भवतीत्यर्थः द्रष्टृदृश्य
योः संयोग इत्युक्तं तत्र दृश्यस्य स्वरूपं कार्यं प्रयोजनं चाह प्रकाशक्रियास्थितिशीलं भूतेंद्रियात्मकं
भोगापवर्गार्थं दृश्यं १८ प्रकाशः सत्त्वस्य धर्मः क्रिया प्रवृत्तिरूपा रजसः स्थितिर्नियमरूपा त
मसः ताः प्रकाशक्रियास्थितयः शीलं स्वाभाविकं रूपं यस्य तत्तथाविधमिति स्वरूपमस्य निर्दिष्टं
भूतेंद्रियात्मकमिति भूतानि स्थूलसूक्ष्मभेदेन पृथिव्यादीनि गंधतन्मात्रादीनि च इंद्रियाणि कर्मेंद्रियादीनि
बुद्धींद्रियांतःकरणभेदेन त्रिविधानि उभयमेतदात्मा ग्रहणरूपमात्मस्वरूपाभिन्नः परि
णामो यस्य तत्तथाविधमित्यनेन कार्यमस्योक्तं भोगः कथितलक्षणः अपवर्गो विवेक
ख्यातिपूर्विका संसारनिवृत्तिः तौ भोगापवर्गौ अर्थः प्रयोजनं यस्य तत्तथाविधं दृश्यमि
त्यर्थः तस्य च दृश्यस्य नानावस्थारूपपरिणामकस्य हेयत्वेन ज्ञातव्यत्वादवस्थाः क
थयितुमाह विशेषाविशेषलिंगमात्रालिंगानि गुणपर्वाणि २० गुणानां पर्वाण्यव
स्था विशेषाश्चत्वारो ज्ञातव्या इत्युपदिष्टं भवति तत्र विशेषो महाभूतेंद्रियाणि॥

ण्यविशेषा स्तन्मात्रांतःकरणौ लिंगमात्रं बुद्धिः अलिंगम व्यक्तमित्युक्तं सर्वत्र गुणास्त्र१
स्या व्यक्तस्यान्वयित्वेन प्रत्यभिज्ञानादवश्यं ज्ञातव्यत्वेन योगकाले चत्वारिपर्वाणि
निर्दिष्टानि॥ एवं हेयत्वेन दृश्यस्य प्रथमं ज्ञातव्यत्वात् तदवस्थास्सहितं व्याख्यायउपा
देयं द्रष्टारं व्याकर्तुमाह॥ द्रष्टा दृशिमात्रः शुद्धोपि प्रत्ययानुपश्यः २१॥ द्रष्टा पुरुषो
दृशिमात्रश्चेतनमात्रः मात्रग्रहणं धर्मधर्मिनिरासार्थं केचिद्धि चेतनामात्मनो धर्म
मिच्छंति॥ स शुद्धोपि परिणामाद्यभावेन स्वप्रतिष्ठोपि प्रत्ययानुपश्यः प्रत्ययाः विषयो
ना पपरक्तानि ज्ञानानि तान्यनु अव्यवधानेन प्रतिसंक्रमाद्यभावेन पश्यति एतदुक्तं भवति जात
विषयोपरागायामेव बुद्धौ सन्निधानमात्रेणैव पुरुषस्य द्रष्टृत्वमिति। स्वरूपमभिधाय भो
क्तृस्याह॥ तदर्थ एव दृश्यस्यात्मा॥२२॥ दृश्यस्य प्रागुक्तलक्षणस्य आत्मा यत्स्वरूपं स
तदर्थः॥ तस्य पुरुषस्य भोक्तृत्वसंपादनं नाम स्वार्थपरिहारेण प्रयोजनं॥ न हि प्रधानं प्र
वर्तमानमात्मनः किंचित्प्रयोजनमपेक्ष्य वर्तते॥ किंतु पुरुषस्य भोगं संपादयामीति प्र
वं पुरुषस्य भोगसंपादनमेव प्रयोजनं तदा संपादिते तस्मिं स्तन्निःप्रयोजनं विरतव्यापा
रं स्यात॥ तस्मिंश्च परिणामशून्ये शुद्धत्वात् सर्वे द्रष्टारो बंधरहिताः स्युस्ततश्च संसारो
छेद इत्याशंक्याह॥ कृतार्थं प्रतिनष्टमप्यनष्टं तदन्यसाधारणत्वात् २३॥ यद्यपि विवेक
ख्यातिपर्यंताद्भोगसंपादनात्कमपि कृतार्थं पुरुषं प्रति तन्नष्टं विरतव्यापारं तथा
पि सर्वपुरुषसाधारणत्वादन्यान्प्रत्यनष्टव्यापारमवतिष्ठते॥ अतः प्रधानस्य सक

लभोक्तृसाधारणत्वान्न कदाचनापि विनाशः॥ एकस्य मुक्तौ च न सर्वेषां मुक्तिप्रसं
ग इत्युक्तं भवति॥ दृश्यद्रष्टारौ व्याख्याय संयोगं व्याख्यातुमाह॥ स्वस्वामिशक्त्योः स्व
रूपोपलब्धिहेतुः संयोगः॥२३॥ कार्यद्वारेणास्य लक्षणं करोति॥ स्वशक्तिर्दृश्यस्य स्व
भावः स्वामिशक्तिर्द्रष्टुः स्वरूपं तयोर्द्वयोरपि संवेद्यसंवेदकत्वेन व्यवस्थितयोर्या स्व
रूपोपलब्धिस्तस्याः कारणं यः संयोगः स च सहजभोग्यभोक्तृस्वभावस्वरूपान्नान्यः॥
न हि तयोर्नित्ययोर्व्यापकयोश्च स्वरूपादतिरिक्तः कश्चित्संयोगः यदेव भोग्यस्य भोग्यत्वं
भोक्तुश्च भोक्तृत्वमनादिसिद्धं स एव संयोगः॥ तस्यापि कारणमाह॥ तस्य हेतुरवि
द्या॥२४॥ या पूर्वं विपर्यासात्मिका मोहरूपा अविद्या व्याख्याता सा तस्य विवेकख्याति
रूपस्य संयोगस्य कारणम्। हेयं हानं क्रियाकर्मोच्यते॥ किंपुनस्तद्धानमित्याह॥ तद
भावात्संयोगाभावो हानं तद्दृशेः कैवल्यम्॥२५॥ तस्या अविद्यायाः स्वरूपविरुद्धेन स
म्यग्ज्ञानेनोन्मूलिताया योऽयमभावस्तस्मिन्सति तत्कार्यस्य संयोगस्याप्यभावस्त
द्धानमित्युच्यते अयमर्थो नैतस्य मूर्तद्रव्यवत्परित्यागो युज्यते॥ किं जातायां विवेक
ख्यातावविवेकनिमित्तः संयोगः स्वयमेव निवर्तत इति तस्य हानं यदेव च संयोगस्य
हानं तदेव नित्यं केवलस्यापि पुरुषस्य कैवल्यं व्यपदिश्यते॥ तदेवं दृश्यस्य संयोग
स्य स्वरूपं कारणं कार्यं चाभिहितम्॥ अथ हानोपायकथनद्वारेणोपायकारणा
माह॥ विवेकख्यातिरविप्लवा हानोपायः॥२६॥ अन्ये गुणा अन्यः पुरुष इत्येवं विध

स्य विवेकस्य ख्यातिः॥ प्रख्या साहानस्य दृश्यपरित्यागस्योपायः कारणं॥ कीदृशी
विप्लवान्निवर्तते विप्लवो विच्छेदोऽन्तरान्तरा व्युत्थानरूपो यस्याः साऽविप्लवा॥ इदम
न्यतो सर्वं प्रतिपक्षभावनाबलादविद्याप्रविलये विनिवृत्तज्ञातृत्वकर्तृत्वाभिमानाया
रजस्तमोमलानभिभूताया बुद्धेरन्तर्मुखाया या चिच्छायासंक्रान्तिः सा विवेकख्यातिरिप्र
च्यते॥ तस्यां चिरसंततसेवनप्रकृष्टतायां दृश्यस्याधिकारनिवृत्तेर्भवत्येव कैवल्यं॥
उत्पन्नविवेकख्यातेः पुरुषस्य यादृशी प्रज्ञा भवति॥ तां कथयति विवेकख्यातेरेव स्वरू
तस्य सप्तधा प्रान्तभूमौ प्रज्ञा ॥२७॥ तस्योत्पन्नविवेकज्ञानस्य ज्ञातव्यविवेकरूपा प्रज्ञा
प्रान्तभूमौ सकलसालंबनसमाधिभूमिपर्यन्ते सप्तप्रकारा भवति॥ तत्र कार्यरूपा
मुक्तिश्चतुःप्रकारा ज्ञातं मयाज्ञेयं न ज्ञातव्यं किंचिदस्ति क्षीणाः मे क्लेशाः न मे किंचि
त् क्षेतव्यमस्ति॥ अधिगतं मया ज्ञानं प्राप्ता मया विवेकख्यातिरिति प्रत्ययान्तरपरि
हारेण तस्यामवस्थायामीदृश्येव प्रज्ञा जायते॥ ईदृशी प्रज्ञा कार्यविषये निर्मलं ज्ञा
नं कार्यविमुक्तिरित्युच्यते॥ चित्तविमुक्तिस्त्रिधा चरिताधिकारा बुद्धिः गुणा हृताचित्
कारणाः गिरिशिखरनिपातिता इव ग्रावाणो पुनः पुनः स्थितिं यास्यन्ति स्वकारणे
प्रलयाभिमुखानां महामोहाभिधानमूलकारणाभावान्निःप्रयोजनत्वाच्चामीषां

कुतः पुरुषः स्वात्मन्येव समाप्तिः तस्मिन् सति स्वरूपप्रतिष्ठोहमिति दृशात्रैः
प्रकाशाच्चित्तविमुक्तिः॥ तदेवमीदृश्याः सप्तविधप्रांतभूमिप्रज्ञायामुपजातायां पुरु
षः कुशल इत्युच्यते॥ विवेकख्यातेः संयोगाभावहेतुत्वमुक्तं तस्यास्तूत्पत्तौ किंनि
मित्तमित्यत आह॥ योगांगानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः॥ २८॥
योगांगानि वक्ष्यमाणानि तेषामनुष्ठानात् ज्ञानपूर्वकादभ्यासादाविवेकख्यातेरशु
द्धिक्षये चित्तसत्वस्य प्रकाशावरणलक्षणक्लेशरूपाशुद्धिक्षये या ज्ञानदीप्तिस्तारत
म्यम सात्विक परिणामो विवेकख्यातिपर्यंतः तस्याः ख्यातेर्हेतुरित्यर्थः॥ योगांगानुष्ठा
दशुद्धिक्षय इत्युक्तं॥ कानि पुनस्तानि योगांगानीति तेषामुद्देशमाह॥ यमनियमासन एवं
प्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावंगानि॥ २९॥ इह कानिचित्समा
धेः साक्षादुपकारकत्वेनांतरंगाणि। यथा धारणादीनि कानिचित्प्रतिपक्षभूतहिंसा
दिवितर्कोन्मूलनद्वारेण समाधेरुपकुर्वंति यथा यमनियमादयः तत्रा
सनादीनामुत्तरोत्तरमुपकारकत्वं॥ क्रमेणैषां स्वरूपमाह॥ अहिंसासत्यास्तेयब्र
ह्मचर्यापरिग्रहा यमाः॥ ३०॥ तत्र प्राणवियोगप्रयोजनव्यापारो हिंसा सा च सर्वानर्थ
हेतुः॥ तदभावोऽहिंसा हिंसायाः सर्वकालमेव परिहार्यत्वात्प्रथमं तदभावरूपाया अहिं

यथा सत्यासनजये प्राणायामस्थैर्यं॥ एवमुत्तरत्रापि योज्यं ३।

स्त्याः निर्दिष्टाः॥ सत्यं वाङ्मनसयोर्यथार्थत्वं' स्तेयं परस्वापहरणं तदभावोऽस्तेयं ब्र
ह्मचर्यमुपस्थसंयमः॥ अपरिग्रहो भोगसाधनानामस्वीकारः" ते एते अहिंसादयः पं
च यमशब्दवाच्याः भवंति॥ योगांगत्वेन निर्दिष्टाः" एषां विशेषमाह॥ एते जातिदेश
कालसमयानवच्छिन्नाः सार्वभौमा महाव्रतं ३१॥ जातिर्ब्राह्मणत्वादिः देशस्तीर्थादिः का
लश्चतुर्दश्यादिः समयो ब्राह्मणप्रयोजनादिः। एतैश्चतुर्भिरनवच्छिन्नाः पूर्वोक्ताः अ
हिंसादयो यमाः सर्वासु क्षिप्तादिषु चित्तभूमिषु भवा महाव्रतमित्युच्यते॥ तद्यथा ब्रा
ह्मणं न हनिष्यामि तीर्थे कंचन न हनिष्यामि चतुर्दश्यां न हनिष्यामि देवब्राह्मणप्र
योजनव्यतिरेकेण कमपि न हनिष्यामीत्येवं चतुर्विधावच्छेदव्यतिरेकेण कंचि
त्कदाचित्कस्मिंश्चिदप्यर्थे न हनिष्यामीत्यनवच्छिन्नाः" एवं सत्यादिषु यथायोगं यो
ज्यं॥ इत्थमनियतीकृताः सामान्येनैव प्रवृत्ता महाव्रतमित्युच्यते॥ न पुनः परिच्छिन्नाव
धारणं नियमानाह॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः॥३२॥
शौचं द्विविधं बाह्यमाभ्यंतरं च बाह्यं मृज्जलादिभिः कायादिप्रक्षालनं आभ्यंतरं मैत्र्या
दिभिश्चित्तमलानां प्रक्षालनं' संतोषस्तुष्टिः शेषाः प्रागेव कृतव्याख्यानाः एते शौचा
दयो नियमशब्दवाच्याः कथमेषां योगांगत्वमित्यत आह॥ वितर्कबाधने प्रपक्षभा। ति
वनं ३३॥ वितर्क्यंत इति वितर्काः योगपरिपंथिनो हिंसादयः तेषां प्रतिपक्षभावने स

त यदि वाध्यो भवति ॥ तदा योगः सुकरो भवतीति भवत्येव यमनियमानां योगांगत्वं
इदानीं वितर्काणां स्वरूपं भेदं प्रकारं कारणं फलं च क्रमेणाह ॥ वितर्का हिंसादयः
कृतकारितानुमोदिता क्रोध लोभ मोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानंतफ
ला इति प्रतिपक्षभावनं ॥ ३४ ॥ एते पूर्वोक्ता हिंसादयः प्रथमं त्रिधा भिद्यंते कृतकारि
तानुमोदितभेदेन तत्र स्वयं निष्पादिताः कृताः कुरु कुर्विति प्रयोजकव्यापारेण समुत्पा
दिताः कारिताः अन्येन क्रियमाणाः साधु साध्विति स्वीकृताः अनुमोदिताः एतच्च
त्रैविध्यं परस्परं व्यामोहनिवारणायोच्यते ॥ अन्यथा मंदमतिरेवं मन्येत न मया स्व
यं हिंसा कृतेति नास्ति मे दोष इति यद्यपि लोभः प्रथमं निर्दिष्टस्तथापि सर्वक्लेशानां मो
हस्यानात्मन्यात्माभिमानलक्षणस्य निदानत्वात्तस्मिन्सति स्वपरविभागपूर्वक
त्वेन लोभक्रोधादीनामुद्भवात् मूलकत्वमवसेयं ॥ मोहपूर्विका सर्वा दोषजातिरि
त्यर्थः ॥ लोभस्तृष्णा क्रोधः कृत्याकृत्यविवेकोन्मूलकः प्रज्वलनात्मकश्चित्तधर्मः ॥ प्र
त्येकं कृतादिभेदेन त्रिधा प्रकारा अपि हिंसादयो मोहादिकारणत्वेन त्रिधा भिद्यंते ॥
तेषामेव पुनरवस्थाभेदेन त्रैविध्यमाह ॥ मृदुमध्याधिमात्राः ॥ मृदवो मंदाः न तीव्राः ना
पि मध्याः न मंदा नापि तीव्राः मध्याः अधिमात्रास्तीव्राः न मध्या नापि मंदाः पाश्चात्या
नवभेदाः इत्थं त्रैविध्ये सति सप्तविंशतिभेदा हिंसादीनामपि प्रत्येकं मृदुमध्या

एतेषां कारणप्रतिपादनायाह लोभक्रोधमोहपूर्वका इति

धिमात्रभेदात्त्रैविध्यं संभवति । तद्यथा यो ऽसौ यो ऽंशस्तयोर्यथा मृदुमृदुर्मृदुमध्यो मृदुतीव्र
इति एषां फलमाह ॥ दुःखाज्ञानानंतफला इति ॥ दुःखं प्रतिकूलतयावभासमानो ।
राजसश्चित्तधर्मः ॥ संशयविपर्ययरूपं ते दुःखाज्ञाने ऽनंतमपरिछिन्नं फलं येषां ते त ।
थोक्ताः इत्थं तेषां स्वरूपकारणादिभेदेन ज्ञातानां प्रतिपक्षभावनया योगिना परि नि
हारः कर्त्तुमिष्टमुपदिष्टं भवति । एषां भाव्यमानानां सात्त्विकमार्गाच्छितामनुत्पाद्यादि यः सि
द्धयो यथा भवंति तथा क्रमेण प्रतिपादयितुमाह ॥ तत्सन्निधौ वैरत्यागः ३५ ॥ तस्या
हिंसां भावयतः सन्निधौ सहजविरोधिनामप्यहिनकुलादीनां वैरत्यागो निर्मत्स
रतयावस्थानं भवति ॥ हिंसारताः हिंस्रत्वं परित्यजंतीत्यर्थः सत्याभ्यासवतः किं भव
तीत्याह ॥ सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वं ३६ ॥ क्रियमाणा हि यागादिकाः फलं क्रि
स्वर्गादिकं प्रयच्छंति । तस्य तु सत्याभ्यासवतो योगिनस्तथा सत्यं प्रकृष्यते यथा ऽ
क्रियायामपि क्रियायाः योगी फलमाप्नोति तद्वचनात् यस्य कस्यचित् क्रियामकुर्वतो ।
ऽपि क्रियाफलं भवतीत्यर्थः ॥ अस्तेयाभ्यासवतः फलमाह ॥ अस्तेयप्रतिष्ठायां सर्वर
त्नोपस्थानं ॥ ३८ ॥ अस्तेयं यदाभ्यस्यति योगी तदा तस्य तत्प्रकर्षान्निरभिलाषस्या
पि सर्वतोदिक्कानि रत्नान्युपतिष्ठंते ॥ ब्रह्मचर्याभ्यासस्य फलमाह ॥ ब्रह्मचर्यप्रति

२६ ध्यासं वीर्यं सामर्थ्यम्॥ वृ॥ यः किल ब्रह्मचर्यमभ्यस्यति तस्य तत्प्रकर्षान्निरतिशयं
सामर्थ्यमाविर्भवति॥ वीर्यनिरोधो हि ब्रह्मचर्यं तस्य प्रकर्षाच्छरीरेन्द्रियमनः
सु वीर्यं प्रकर्षमागच्छति। अपरिग्रहस्य फलमाह॥ अपरिग्रहस्थैर्ये
जन्मकथंतासंबोधः॥३९॥ कथमित्यस्य भावः कथंता जन्मनः कथंता जन्मनः क
थंता जन्मकथंता तस्याः संबोधः सम्यग्ज्ञानं जन्मांतरे कोऽहमासं कीदृशः किं
कार्यकारीति जिज्ञासायां सर्वमेव सम्यग्जानातीत्यर्थः॥ न केवलं भोगसाध
नपरिग्रह एव परिग्रहः यावदात्मनः शरीरपरिग्रहोऽपि परिग्रहः भोगसाध
नत्वाच्छरीरस्य तस्मिन्सति रागानुबंधाद्बहिर्मुखायामेव प्रवृत्तौ न तात्त्विकज्ञान
प्रादुर्भावः॥ यदा पुनः शरीरादिपरिग्रहनैरपेक्ष्येण माध्यस्थ्यमवलंबते तदा मध्यस्थ ध्य
स्य रागादित्यागात्सम्यग्ज्ञानहेतुर्भवत्येव पूर्वापरजन्मसंबोधः उक्ता यमानां
सिद्धयः॥ अथ नियमानामाह॥ शौचात्स्वांगजुगुप्सा परैरसंसर्गः ४०॥ यः शौचं भा
वयति तस्य स्वांगेष्वपि कारणस्वरूपपर्यालोचनद्वारेण जुगुप्सा घृणा समुप
जायते अशुचिरयं कायो नात्राग्रहः कार्यः अनेनैव हेतुना परैरन्यैश्च काय
वद्भिरसंसर्गः संसर्गाभावः संसर्गपरिवर्जनमित्यर्थः॥ यः किल स्वमेव कायं
१६

जुगुप्सते तत्त्वदर्शी सकथं परकीयैस्तथाभूतैः कायैः संसर्गमनुभवति
शौचस्यैव फलांतरमाह॥ सत्वशुद्धिसौमनस्यैकाग्र्येंद्रियजयात्मदर्शनयो
ग्यत्वानि च ४२ भवंतीति वाक्यशेषः सत्वं प्रकाशसुखाद्यात्मकं तस्य शु
द्धिः रजस्तमोभ्यामनभिभवः॥ सौमनस्यं खेदाननुभवेन मानसी प्रीतिः एका ग्र
ता नियतेंद्रियविषये चेतसः स्थैर्यं इंद्रियजयो विषयपराङ्मुखानामिंद्रि
याणां स्वात्मन्यवस्थानं आत्मदर्शने विवेकख्यातिरूपे चित्तस्य योग्यत्वं
शौचाभ्यासवत एते सत्वशुद्ध्यादयः क्रमेण प्रादुर्भवंति॥ तथाहि सत्वशुद्धेः
सत्वशुद्धिः सत्वशुद्धेः सौमनस्यं सौमनस्यादैकाग्र्यता एकाग्रताया इंद्रियज
यः इंद्रियजयादात्मदर्शनयोग्यतेति॥ संतोषाभ्यासस्य फलमाह॥ संतोषा
दनुत्तमः सुखलाभः ४३॥ संतोषप्रकर्षेण योगिनस्तथाविधमांतरं सुखमा
विर्भवति॥ यस्य बाह्यविषयसुखं शतांशेनापि न समं॥ तपसः फलमाह॥ का
येंद्रियसिद्धिरशुद्धिक्षयात्तपसः ४४॥ तपः समभ्यस्यमानं चेतसः क्लेशादि
लक्षणाशुद्धिक्षयद्वारेण कायेंद्रियाणां सिद्धिमुत्कर्षमादधाति॥ अयमर्थः॥ चां

द्रायणादिना चित्तक्लेशक्षयस्तत्क्षयादिंद्रियाणां सूक्ष्मव्यवहितविप्रकृष्ट
दर्शनादिसामर्थ्यमाविर्भवति। कायस्य यथेच्छं अणुत्वमहत्त्वादीनि। स्वा॰
ध्यायस्य फलमाह॥ स्वाध्यायादिष्टदेवतासंप्रयोगः ४४ अभिप्रेतमंत्रजपा
दिलक्षणे स्वाध्याये प्रकृष्यमाणे योगिनः॥ इष्टयाभिप्रेतया देवतया संप्रयो
गो भवति। सा सास्य देवता प्रत्यक्षा भवतीत्यर्थः॥ ईश्वरप्रणिधानस्य फलमाह॥
समाधिसिद्धिरीश्वरप्रणिधानात् ४५ ईश्वरे योयं भक्तिविशेषस्तस्मात् समाधेर
क्तलक्षणस्याविर्भावो भवति॥ यस्मात् स भगवानीश्वरः प्रसन्नः सन्नंतरायरूपा
न्क्लेशान् अपहृत्य समाधिमुद्बोधयति॥ यमनियमानुक्त्वासनमाह॥ तत्र स्थि
रसुखमासनं ४६ आस्यतेऽनेनेत्यासनं पद्मासनं दंडासनं स्वस्तिकासनादि
तद्यदा स्थिरं निष्कंपं सुखं अनुद्वेजनीयं भवति॥ तदा तद्योगांगतां भजते॥ त
स्यैव स्थिरसुखत्वप्राप्त्यर्थं उपायमाह॥ प्रयत्नशैथिल्यानंत्यसमापत्तिभ्यां तदासने पि
४७॥ प्रयत्नशैथिल्येनानंत्यसमापत्त्या च स्थिरसुखं भवतीति संबंधः। यदा यदा आस
नं बध्नामीति इच्छां करोति प्रयत्नस्य शैथिल्येप्यक्लेशेनैव तदासनं निष्पद्यते॥ य
दा आकाशादिगते आनंत्ये चेतसः समापत्तिः क्रियते अवधानेन तादात्म्यमा॰

पद्यते। तदा देहाहंकाराभावान्नासनं दुःखजनकं अस्मिंश्चासनजये सति स
माध्यंतरायभूतानप्रभवं स्यंगमेजयत्वादयः । तस्यैवानुनिष्पादितस्यैव
फलमाह॥ ततो द्वंद्वानभिघातः ४८॥ तस्मिन्नासनजये सति द्वंद्वैः शीतोष्ण
क्षुत्तृष्णादिभिर्योगी नाभिहन्यत इत्यर्थः॥ आसनजयादनंतरं प्राणाया
ममाह॥ तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः॥ ४९॥ आस
नस्थैर्ये सति तन्निमित्तकः प्राणायामलक्षणो योगांगविशेषोऽनुष्ठेयो भव
ति। कीदृशः श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः श्वासप्रश्वासौ कृतलक्ष
णौ तयोस्त्रिधा रेचनापूरणाकुंभकद्वारेण बाह्याभ्यंतरेषु गतेः प्रवाहस्य
विच्छेदो धारणं प्राणायाम उच्यते। तस्यैव सुखावगमाय विभज्य स्वरूपं
कथयति स तु बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घ
सूक्ष्मः ५०। बाह्यवृत्तिः श्वासो रेचकः अंतर्वृत्तिः श्वासः पूरकः अंतर्वृत्तिस्तं
भोकुंभकः तस्मिन्जलमिव कुंभे निश्चलतया प्राणा अवस्थाप्यंत इति कुंभ
कः त्रिविधोयं प्राणायामो देशेन कालेन संख्यया चोपलक्षितो दीर्घसू
क्ष्मसंज्ञो भवति देशेनोपलक्षितो यथा नाशाद्वादशांतादौ नाशामारभ्य हु

सा सा

दशांगुलिपर्यंतमित्यर्थः कालेनोपलक्षितो षट्त्रिंशन्मात्रादिप्रमाणाः संख्य
18 योपलक्षितो यथाद्रुयतो वा यावत्कृतश्वासावधिः श्वासप्रश्वासैः प्रथमउ
द्घातो भवतीति इत्येतत् स्थानाय संख्याग्रहणमुपात्तं उद्घातो नाभिमूला स
त्प्रेरितस्य वायोः शिरस्यभिहननं त्रीन्प्राणायामानभिधाय चतुर्थमभिधा
तुमाह॥ बाह्याभ्यंतरविषयाक्षेपी चतुर्थः ५२॥ प्राणस्य बाह्यो विषयो द्वा
दशांतादिः अभ्यंतरो विषयो हृदयनाभिचक्रादिः तौ द्वौ विषयावाक्षिप्य पर्या
लोच्य यः स्तंभरूपो गतिविच्छेदः स चतुर्थः प्राणायामः॥ तृतीयस्मात्कुंभ
कादयमस्य विशेषः बाह्याभ्यंतरौ विषयावपर्यालोच्यैव सहसा तप्तो
पलन्निपतितजलन्यायेन युगपत् स्तंभवृत्त्या निष्पद्यते अस्य तु विषयद्व
याक्षेपको निरोधः अयमप्येवं देशकालसंख्याभिरुपलक्षितो द्रष्ट
व्यः॥ चतुर्विधस्यास्य फलमाह॥ ततः क्षीयते प्रकाशावरणं ५३॥ ततस्त
स्मात्प्राणायामात् प्रकाशस्य चित्तसत्त्वगतस्य यदावरणं क्लेशरूपं तत्
क्षीयते विनश्यतीत्यर्थः फलांतरमाह॥ धारणासु च योग्यता मनसः ५४

धारणास्वक्षमा णालक्षणः॥ तास्तु प्राणायामैः क्षीणदोषं मनो यत्र यत्र धार्य
ते तत्र तत्र स्थिरं भवति॥ नाविशेषं भजते॥ प्रत्याहारस्य लक्षणमाह। स्वस्व
विषयसंप्रयोगाभावे चित्तस्य स्वरूपानुकार इवेंद्रियाणां प्रत्याहारः॥५५॥
इंद्रियाणि स्वस्वविषयेभ्यः प्रतीपमाह्रियंतेऽस्मिन्निति प्रत्याहारः॥ स च
कथं निष्पद्यत इत्याह॥ चक्षुरादीनामिंद्रियाणां स्वस्वविषयो रूपा
दिस्तेन संप्रयोगस्तदाभिमुख्येन प्रवर्तनं तदभावस्तदाभिमुख्यं पारित्य
ज्य स्वरूपमात्रेवस्थानं तस्मिन्सति चित्तस्वरूपानुकारीणींद्रियाणि भवं
ति ततश्चित्तमनुवर्तमानानि मधुकरराजमिव मधुकरमक्षिकाः सर्वा
णींद्रियाणि प्रवर्तंते॥ अतश्चित्तनिरोधे तानि प्रत्याहृतानि भवंति। तेषां
तत्स्वरूपाकारः प्रत्याहार उक्तः फलमाह॥ ततः परमा वश्यतेंद्रियाणां॥५६॥
अभ्यस्यमाने हि प्रत्याहारे तथा वश्यान्यायत्तानींद्रियाणि संपद्यंते यथा
बाह्याभिमुखतां नीयमानान्यपि न यांति तस्यैः। तदेवं प्रथमपादोक्तलक्षणा

योगस्यांगभूतं क्लेशतनूकरणफलं क्रियायोगमभिधाय क्लेशानामुद्दे
स्वरूपं कारणं क्षेत्रं फलं चोक्त्वा कर्मणामपि भेदं कारणं स्वरूपं फलं चाभि
धाय विपाकस्य स्वरूपं कारणं चाभिहितं।। ततस्त्याज्यत्वात् क्लेशादीनां ज्ञा
नव्यतिरेकेण त्यागस्याशक्यत्वात् ज्ञानस्य च शास्त्रायत्तत्वाच्छास्त्रस्य च
हेयहानकरणोपादेयोपादानकारणत्वेन चतुर्व्यूहत्वाद्धेयस्य च हानम
तिरेकेण स्वरूपानिष्पत्तेः हानसहितं चतुर्व्यूहं स्वस्वकारणसहितमभि
धायोपादानकारणभूताया विवेकख्यातेः कारणभूतानामंतरंगब
हिरंगभावेन स्थितानां योगांगानां यमादीनां स्वरूपं फलसहितं व्या
ख्याय ध्यारणापर्यंतानां चासनादीनां परस्परमुपकार्योपकारकभावेना
वस्थितानामुद्देशमभिधाय परस्परं लक्षणपूर्वकं फलमभिहितं तदेवं यो
गो यमनियमादिभिः प्राप्तबीजभावः।। आसनप्राणायामैरंकुरितः प्रत्याहा
रेण कुसुमितो ध्यानधारणासमाधिभिः फलिष्यतीति व्याख्यातः सा
धनपादः।। इति श्रीमहाराजाधिराजभोजदेवविरचितायां राजमार्तं
डाभिधानायां पातंजलयोगशास्त्रवृत्तौ द्वितीयः साधनपादः समाप्तः २।।

ॐ यस्पादपद्मस्मरणादणिमादिविभूतयः भवंति भवतामस्तु भूतनाथः स भू-
तये॥१॥ तदेवं पूर्वोद्दिष्टं धारणाद्यंगत्रयं निरूप्य संयमसंज्ञाभिधानपूर्वं बा-
ह्याभ्यंतरादिसिद्धिप्रतिपादनाय लक्षयितुमुपक्रमते तत्र धारणायाः
स्वरूपमाह॥ देशबंधश्चित्तस्य धारणा १॥ देशे नाभिचक्रनासाग्रादौ चित्त-
स्य बंधो विषयांतरपरिहारेण यत्स्थिरीकरणं सा चित्तस्य धारणोच्यते॥
अयमर्थः मैत्र्यादिचित्तपरिकर्मवासितांतःकरणेन यमनियमवता जितासने-
न परिहृतप्राणविक्षेपेण प्रत्याहृतेंद्रियग्रामेण निर्बाधप्रदेशे ऋजुकायेन जि-
तद्वंद्वेन योगिना नासाग्रादौ संप्रज्ञातसमाधेरभ्यासाय चेतसः स्थिरीकर-
णं कर्तव्यमिति धारणामभिधाय ध्यानमभिधातुमाह॥ तत्र प्रत्ययैकता-
नता ध्यानं २॥ तत्र तस्मिन्देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ज्ञानस्य यैकता-
नता विसदृशपरिणामपरिहारद्वारेण यदेव धारणायामालंबनीकृतं तदा-
लंबनतयैव निरंतरमुत्पत्तिः सा ध्यानमित्युच्यते॥ चरमयोगांगं समाधिमाह॥
तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ३॥ तदेवोक्तलक्षणं ध्यानं य-

त्रार्थमात्रनिर्भासं ग्रहणीकारसमावेशादुद्भूतार्थरूपं न्यग्भूतज्ञानस्वरूपत्वेन
स्वरूपशून्यतामिवापद्यते समाधिरित्युच्यते। सम्यगाधीयते एकाग्रीक्रियते
विक्षेपान्परिहृत्य यत्र मनः स समाधिः। उक्तलक्षणस्य योगांगत्रयस्य व्यवहाराय
स्वशास्त्रे तांत्रिकीं संज्ञां कर्तुमाह॥ त्रयमेकत्र संयमः॥४॥ एकस्मिन्विषये धा
रणाध्यानसमाधिलक्षणं त्रितयं प्रवर्त्तमानं संयमसंज्ञया शास्त्रे व्यवह्रियते त
स्य फलमाह॥ तज्जयात्प्रज्ञालोकः॥५॥ तस्य संयमस्य जयादभ्यासेन सात्म्यात्पा
दनात्प्रज्ञाया ज्ञातव्यविवेकरूपाया आलोकः प्रसरो भवति। प्रज्ञा ज्ञेयं सम्यग
वभासतीत्यर्थः। तस्योपयोगमाह॥ तस्य भूमिषु विनियोगः॥६॥ तस्य संयम
स्य भूमिषु स्थूलसूक्ष्मालंबनभेदेन स्थितासु चित्तवृत्तिषु विनियोगः कर्तव्यः।
अधरामधरां चित्तभूमिं जितां जितां ज्ञात्वोत्तरस्यां भूमौ संयमः कार्यः। न ह्य
नात्मीकृताधरभूमिरुत्तरस्यां भूमौ संयमं कुर्वाणः फलभाग्भवति। साधन
पादे योगांगान्यष्टावुद्दिश्य पंचानां लक्षणं विधायात्र त्रयाणां कथं न कृतमित्या
शंक्याह॥ त्रयमंतरंगं पूर्वेभ्यः॥७॥ पूर्वेभ्यो यमादिभ्यो योगांगेभ्यः पारंपर्ये
ण समाधेरुपकारकेभ्यो धारणादि योगांगत्रयं संप्रज्ञातस्य समाधेरंत

रंगं समाधिस्वरूपनिष्पादनात्तस्यापि समाध्यंतरापेक्षयाबहिरंगत्वमाह ।
तदपि बहिरंगं निर्बीजस्य ८ ॥ निर्बीजस्य योगस्य निरालंबत्वस्य पूर्वस्य भा
वनापारंपर्य्यस्य समाधेरेतदपि योगांगत्रयं बहिरंगं पारंपर्य्येणोपकारक
त्वात् ॥ इदानीं योगांगत्रयस्य सिद्धिरारब्धा तु क्रमः संयमस्य विषयपरिशुद्धिं कर्त्तुं क्रमे
णपरिणामत्रयमाह ॥ व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोध
लक्षणचित्तान्वयो निरोधपरिणामः ९ ॥ व्युत्थानं क्षिप्तमूढविक्षिप्ताख्यं भू
मित्रयं निरोधः प्रकृष्टसत्वस्यांगितया चेतसः परिणामः ताभ्यां व्युत्थाननि
रोधाभ्यां योजनितौ संस्कारौ तयोर्यथाक्रममभिभवप्रादुर्भावौ यदा भवतः अ
भिभवो न्यग्भूततया कार्य्यकरणासामर्थ्येनावस्थानं प्रादुर्भावो वर्तमानेऽध्व
नि अभिव्यक्तरूपतयावस्थानं ॥ तदा निरोधलक्षणे चित्तस्यान्वयित्वाद
न्वयो यः स निरोधपरिणाम उच्यते अयमर्थः यदा व्युत्थानसंस्काररूपो ध
र्मस्तिरोभूतो भवति निरोधसंस्काररूपश्चाविर्भवति धर्मिरूपतया च चित्तमुभ
यत्रान्वयित्वेनाथिवेनावस्थितं प्रतीयते तदा स निरोधपरिणामशब्देन व्यवह्रि

यते॥ चलत्वाद्गुणवृत्तस्य यद्यपि चेतसा निश्चलत्वं नास्ति तथाप्येवंभूतः परि
णामः स्थैर्यमुच्यते॥ अस्यैव फलमाह॥ तस्य प्रशांतवाहिता संस्कारात्॥१०॥
तस्य चेतस उक्तान्निरोधसंस्कारात्प्रशांतवाहिता भवति॥ परिहृतविक्षेपतया स
दृशप्रवाहपरिणामि चित्तं भवतीत्यर्थः॥ निरोधपरिणाममभिधाय समाधि
परिणाममाह॥ सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः॥
११॥ सर्वार्थता चलत्वान्नानाविधार्थग्रहणं चित्तस्य विक्षेपो धर्मः॥ एक
स्मिन्नेवालंबने सदृशपरिणामता एकाग्रत्वं तदपि चित्तस्य धर्मः॥ तयोर्य
थाक्रमं क्षयोदयौ सर्वार्थतालक्षणस्य धर्मस्य क्षयोऽत्यंतमभिभवः॥ एकाग्र
तालक्षणस्य धर्मस्य प्रादुर्भावोऽभिव्यक्तिश्चित्तस्योद्रिक्तसत्वस्यान्वयितया
वस्थानं समाधिपरिणाम इत्युच्यते॥ पूर्वस्मात्परिणामादस्यायं विशेषः॥ तत्र सं
स्कारलक्षणयोर्धर्मयोरभिभवप्रादुर्भावौ पूर्वस्य व्युत्थानसंस्काररूपस्य
धर्मस्य न्यग्भावः॥ उत्तरस्य निरोधसंस्काररूपस्योद्भवोऽनभिभूतत्वेनावस्था
नं॥ इह तु क्षयोदयाविति सर्वार्थतारूपस्यात्यंततिरस्कारादनुत्पत्तिरतीतेऽध्व
नि प्रवेशलयः॥ एकाग्रतालक्षणस्य धर्मस्योद्भवो वर्तमानेऽध्वनि प्रकटत्वं॥

स्तीयमेकाग्रतापरिणाममाह॥ शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रताप
रिणामः॥१२॥ समाहितस्यैव चित्तस्यैकः प्रत्ययो। वृत्तिविशेषः॥ शान्तोऽतीत
ध्वानं प्रविष्टः॥ अपरस्तूदितो वर्तमानेऽध्वनि स्फुरितः द्वावपि समाहितचि
त्तस्य तुल्यावेकरूपालम्बनत्वेन सदृशौ प्रत्ययौ उभयत्रापि समाहितस्यैव चि
त्तस्यान्वयित्वेनावस्थानं स एकाग्रतापरिणाम इत्युच्यते॥ चित्तस्य परिणा
मोक्तं रूपमन्यत्राप्यतिदिशन्नाह॥ एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरि
णामा व्याख्याताः॥१३॥ एतेन त्रिविधोक्तेन चित्तपरिणामेन भूतेषु स्थूलसू
क्ष्मेषु इन्द्रियेषु बुद्धिकर्मेतः करणभेदेनावस्थितेषु धर्मलक्षणावस्थाभेदे
न त्रिविधः परिणामो व्याख्यातोऽवगन्तव्यः॥ अवस्थितस्य धर्मिणः पूर्वध
र्मनिवृत्तौ धर्मान्तरोत्पत्तिः धर्मपरिणामः॥ यथा मृल्लक्षणस्य धर्मिणः पिंड
रूपधर्मपरित्यागेन घटरूपधर्मान्तरस्वीकारो धर्मपरिणाम इत्युच्यते॥ लक्ष
णपरिणामो यथा तस्यैव घटस्यानागताध्वपरित्यागेन वर्तमानाध्व
स्वीकारः तत्परित्यागेन चातीताध्वपरिग्रहः॥ अवस्थापरिणामो यथा
तस्यैव घटस्य प्रथमद्वितीययोः सदृशयोः क्षणयोरन्वयित्वेन यतश्च लं १

उरणाच्छक्तिनानाविधरणामनाराछरणामपद्यास्ते ननु कोयं धर्मी इत्याशंक्य ध
र्मिणो लक्षणमाह॥ शांतोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥१४॥ शां
ता ये कृतस्वस्वव्यापारा उपरतास्तेऽतीतास्त्वनुपविष्टा उदिता येऽनागतम
ध्वानं परित्यज्य स्वं स्वं व्यापारं कुर्वन्ति अव्यपदेश्या ये शक्तिरूपेणावस्थि
ता व्यपदेष्टुं न शक्यन्ते॥ ते च यथा सर्वं सर्वात्मकमित्येवमादयो नियते
कार्यकारणरूपयोग्यतयाऽवच्छिन्ना शक्तिरेवेह धर्मिशब्देनाभिधीय
ते॥ तत्त्रिविधमपि धर्मं योऽनुपतत्यनुवर्तते ऽन्वयित्वेन स्वीकरोति स शांतो
दिताव्यपदेश्यधर्मानुपाती धर्मीत्युच्यते॥ यथा सुवर्णं रुचकरूपधर्म
परित्यागेन स्वस्तिकरूपधर्मान्तरपरिग्रहे सुवर्णरूपतयानुवर्तमानं
तेषु धर्मेषु कथंचिद्भिन्नेषु धर्मिरूपतया सामान्यात्मना धर्मरूपतया वि
शेषात्मना स्थितं॥ अनुपपन्नत्वेनावभासते एकस्य धर्मिणः कथमनेके
परिणामा इत्याशंकामपनेतुमाह॥ क्रमान्यत्वं परिणामान्यत्वे हेतुः॥१५॥
धर्मिणामुक्तलक्षणानां यः क्रमस्तस्य प्रतिक्षणमन्यत्वं परिदृश्यमा

तं परिणामस्यात्तद्धर्मलक्षणावस्थान्यत्वेनानाविधत्वे हेतुर्लिंगं ज्ञापकं भव
ति॥ अयमर्थः यो यन्नियतः क्रमो मृच्चूर्णपिण्डस्ततः कपालानि तेभ्य
श्च घट इत्येवं रूपः वा परिदृश्यमानः स परिणामस्यान्यत्वमावेदयति॥ त
स्मिन्नेव धर्मिणि यो लक्षणपरिणामस्यावस्थापरिणामस्य च क्रमः।
सोप्यनेनैव न्यायेन परिणामान्यत्वे गमकोऽवगंतव्यः॥ सर्वे एव भावा
नियतेनैव क्रमेण प्रतिक्षणं परिणममाना दृश्यंते॥ अतः सिद्धं क्रमान्य
त्वात्परिणामान्यत्वं सर्वेषां चित्तविषयादीनां परिणममानानां केचि
द्धर्माः प्रत्यक्षेणैवोपलभ्यंते॥ यथा सुखादयः संस्थानादयश्च केचिच्चैकांते
नानुमानगम्याः॥ यथा धर्मसंस्कारशक्तिप्रभृतयः धर्मिणश्च भिन्नाभिन्न
रूपतया सर्वत्रानुगमः॥ इदानीं प्रकृतस्य संयमस्य विषयप्रदर्शनद्वारेण
सिद्धीः प्रतिपादयितुमाह॥ परिणामत्रयसंयमादतीतानागतज्ञानं॥१६॥
धर्मलक्षणावस्थाभेदेन यत्परिणामत्रयमुक्तं तत्र संयमात्तस्मिन्विष
ये पूर्वोक्तस्य संयमस्य करणादतीतानागतज्ञानं योगिनः समाविर्भवे

23 तिइदमत्रतात्पर्यं॥ अप्रसिद्धस्याभिप्रायस्य अनुभवंयनीः इदंलक्षणाभियमवस्थात्रया
नागताद्यध्वतः समेत्य वर्तमाने ऽध्वनि स्वंव्यापारं विधायातीतमध्वानं
प्रविशतीत्येवं परिहृतविक्षेपतया यदा संयमं करोति तदा यत्किंचिदतिक्रां
तमनुत्पन्नं वा तत्सर्वं योगी जानाति॥ यतश्चित्तस्य शुद्धसत्त्वप्रकाशरूप
त्वात् सर्वार्थग्रहणसामर्थ्यमविद्यादिभिर्विक्षेपैरपारुध्यते यदा तु तैस्तै
रुपायैर्विक्षेपाः परिहृयंते तदा निवृत्तमलस्य वादर्शस्य सर्वार्थग्रहणसा
मर्थ्यमेकाग्रताबलादाविर्भवति सिद्ध्यंतरमाह॥ शब्दार्थप्रत्ययानामितरेतरा
ध्यासात्संकरस्तत्प्रविभागसंयमात्सर्वभूतरुतज्ञानं १७॥ शब्दः
श्रोत्रेंद्रियग्राह्यो नियतक्रमवर्णात्मको नियतैकार्थप्रतिपत्त्यवच्छिन्नः॥।
यदा वाक्रमरहितः स्फोटात्मा शास्त्रसंस्कृतबुद्धिग्राह्यः उभयथापि पदरूपो
वाक्यरूपश्च तयोरेवार्थप्रतिपत्तौ सामर्थ्यात्॥ अर्थो जातिगुणक्रियादिः
प्रत्ययो ज्ञानं विषयाकारा बुद्धिवृत्तिः॥ एषां शब्दार्थज्ञानानां व्यवहारे इतरे
तराध्यासाद्भिन्नानामपि बुद्ध्येकरूपतासंपादनात्संकीर्णत्वं॥ तथाहि गा

मातये सुके। कश्चित्तु गोलक्षणमर्थं च गोत्वजात्यवच्छिन्नं सास्नादिमत्पिर
ण्डरूपं शब्दं च तद्वाचकं ज्ञानं च तद्ग्राहकं अभेदेनैव व्यवस्यति॥ न त्वस्य गोश
ब्दो वाचकोऽयं गोशब्दस्य वाच्यस्त्विदं ग्राहकं ज्ञानं इति भेदेन व्यवहरति॥ तथा
हि कोऽयमर्थः कोऽयं शब्दः किमिदं ज्ञानमिति पृष्टः सर्वत्रैकरूपमेवोत्तरं इति गौरि
ति स प्रत्येकरूपतां न प्रतिपद्येत कथमेकरूपमुत्तरं प्रयच्छति॥ एवं तस्मिन्नवा
स्थिते योऽयं विभागः। इदं शब्दतत्त्वं यद्वाचकत्वं नाम इदमर्थस्य यद्वाच्यत्वं इदं
ज्ञानस्य यत्प्रकाशत्वमिति प्रविभागे विद्यापतस्मिन्प्रविभागे यः संयमं करोति त
स्य सर्वेषां भूतानां मृगपशुपक्षिसरीसृपादीनां यद्रुतं यः शब्दस्तत्र ज्ञानमुत्पद्य
ते। अनेनाभिप्रायेणोतेनायं शब्दः समुच्चारित इति सर्वं जानातीति सिद्धान्तरमाह॥
संस्कारसाक्षात्करणात् पूर्वजातिज्ञानं। १८। द्विविधाश्चित्तस्य वासनारूपाः
संस्काराः केचित्स्मृतिमात्रोत्पादनफलाः केचिज्जात्यायुर्भोगलक्षणविपाक
हेतवः यथा धर्माधर्माख्याः तेषु संस्कारेषु यदा संयमं करोति एवं मया सोऽर्थोऽनुभूत
एवं मया सा क्रिया निष्पादितेति॥ सिद्धान्तरमाह॥ पूर्ववृत्तं सर्वमनुसंदध्यातो भाव

नयैवावबोध्यकैमंतरेणोद्बुद्धसंस्काराः सर्वमतीतं स्मरति क्रमेणा साक्षात्कृतेषु पू
र्वेषु संस्कारेषु पूर्वजन्मानुभूतानपि जात्यादीन् प्रत्यक्षेणावपश्यति॥ सिद्ध्यंतर
माह॥ प्रत्ययस्य परचित्तज्ञानं॥१९॥ प्रत्ययस्य परचित्तस्य केनचिन्मुखरागादि
लिंगेन गृहीतस्य यदा संयमं करोति तदा परकीयस्य चित्तस्य ज्ञानमुत्पद्यते॥ स
रागमस्य चित्तं विरागं वेत्ति परचित्तगतानपि धर्मादीन् जानातीत्यर्थः॥ अस्यैव
परचित्तज्ञानस्य विशेषमाह॥ न तत्सालंबनं तस्याविषयीभूतत्वात्॥२०॥
तस्य परस्य यच्चित्तं तत्सालंबनं स्वकीयेनालंबनेन सहितं न शक्यते ज्ञातुं आलंब
नस्य केनचिल्लिंगेनाविषयीकृतत्वात् लिंगाच्चित्तमात्रं परस्यावगतं न तु नीलवि
षयमस्य चित्तं पीतविषयमिति वा यच्च न गृहीतं तत्र संयमस्य कर्तुमशक्यत्वा
न्न भवति परचित्तस्य यो विषयस्तद्ज्ञानं तस्मात्परकीयचित्तं नालंबनसहि
तं गृह्यते तस्यालंबनस्याग्रहीतत्वात् चित्तधर्माः पुनः गृह्यंत एव॥ यदा तु
किमनेनालंबितमिति प्रणिधानं करोति॥ तदा तत्संयमात्तद्विषयमपि ज्ञान
मुत्पद्यते॥ एवं सिद्ध्यंतरमाह॥ कायरूपसंयमात्तद्ग्राह्यशक्तिस्तंभे चक्षुःप्र

काशासंप्रयोगेंतर्धानं ॥२१॥ कायः शरीरं तस्य रूपं चक्षुर्ग्राह्यो गुणः तस्मि
न्काये रूपमस्तीति संयमात्तस्य रूपस्य चक्षुर्ग्राह्यत्वरूपा या शक्तिः तस्याः स्तं
भे भावनावशात्प्रतिबंधे चक्षुःप्रकाशासंयोगे चक्षुषः प्रकाशः सत्वधर्म
स्तस्यासंयोगे तद्ग्रहणस्य व्यापाराभावे योगिनोंतर्धानं भवति ॥ न केन
चिद्दृश्यत इत्यर्थः । एवं कायशब्दस्पर्शरसगंध संयमात्तद्ग्राह्यश
क्तिस्तंभे श्रोत्रत्वग्रसनघ्राणाप्रकाशासंयोगे तदंतर्धानमिति सूत्रस्र
तोयं ॥ एतेन शब्दाद्यंतर्धानमुक्तं ॥२२॥ एतेनैव रूपाद्यंतर्धानोपायप्रद
र्शनेन शब्दादीनां श्रोत्रादिग्राह्यतामंतर्धानमुक्तं वेदितव्यं । सिद्ध्यंतरमा
ह ॥ सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरांतज्ञानमरिष्टेभ्यो वा ॥२३॥
ऽआयुर्विपाकं यत्पूर्वकृतं कर्म तद्द्विप्रकारं सोपक्रमं निरुपक्रमं तत्र सो
पक्रमं यत्फलजननायोपक्रमेण कार्यकरणाभिमुख्येन सह वर्तते ॥ य
थोष्णप्रदेशे प्रसारितमार्द्रवस्त्रं शीघ्रमेव शुष्यति । उक्तरूपविपरीतं निरुपक्र
मं यथा तदेवार्द्रवासः संवर्तितमनुष्णदेशे चिरेण शोषमेति । तस्मिन्द्विविधे

कर्मणि यः संयमं करोति किं मम कर्म शीघ्रविपाकं किं वा चिरविपाकमि
ति॥ एवं ध्यानदार्ढ्यात् अपरांतज्ञानमस्योत्पद्यते अपरांतः शरीरवि
योगः तस्मिन् ज्ञानम् अमुष्मिन् काले ऽमुष्मिन्देशे मम शरीरवियोगो भविष्य
तीति निःसंशयं जानाति। अरिष्टेभ्यो वा॥ अरिष्टानि त्रिविधानि आध्या
त्मिकाधिभौतिकाधिदैविकभेदेन॥ तत्राध्यात्मिकानि पिहितकर्णः को
ष्ठ्यस्य वायोर्घोषं न शृणोतीत्येवमादीनि आधिभौतिकानि अकस्मा
द्विकृतपुरुषदर्शनादीनि॥ आधिदैविकानि॥ अकाल एव द्रष्टुमशक्य
स्वर्गपदार्थदर्शनादीनि तेभ्यः शरीरवियोगकालं जानाति यद्यप्ययो
गिनामप्यरिष्टेभ्यः प्रायेण ज्ञानमुत्पद्यते॥ तथापि तेषां सामान्याका
रेण तत् संशयरूपं योगिनां पुनर्नियतकालदेशतया प्रत्यक्षवदव्यभिचा
रि परिकर्मनिर्दिष्टाः सिद्धीरुपपादयितुमाह॥ मैत्र्यादिषु बलानि २४।
मैत्री करुणा मुदितोपेक्षासु यो विहितः संयमस्तस्य बलानि मैत्र्यादी
नां संबंधीनि प्रादुर्भवंति मैत्रीकरुणामुदितास्तथास्य प्रकर्षं गच्छंति॥

यथा सर्वस्य मैत्र्यादिकं संपद्यत एवेत्यत्र सिद्ध्यंतरमाह॥ बलेषु हस्तिब
लादीनि॥२५ हस्त्यादि संबंधिषु बलेषु कृतसंयमस्य तत्तद्बलानि हस्त्या
दिबलानि आविर्भवंति तदयमर्थः यस्मिन् हस्तिबले वायुवेगे वा सिंह
वीर्ये वा तन्मयीभावेन संयमं करोति तत्सर्वसामर्थ्यं युक्त्वा सर्वस्य प्रादु
र्भवतीत्यर्थः॥ सिद्ध्यंतरमाह॥ प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृ
ष्टज्ञानं॥ प्रवृत्तिर्विषयवती ज्योतिष्मती च प्रागुक्ता तस्यां यो सा वा
लोकः सात्त्विकप्रकाशप्रसरस्तस्यानिखिलेषु विषयेषु न्यासात् तद्वासितानां
विषयाणां भावनात् सांतःकरणेच्छिद्रियेषु प्रकृष्टशक्तिमापन्नेषु सूक्ष्मस्य परमाण्वा
देर्व्यवहितस्य भूमंतर्गतस्य निधानादेर्विप्रकृष्टस्य मेरुपरपार्श्ववर्तिनो रसायना
देर्ज्ञानमुत्पद्यते॥ एतत्समानवृत्तांतं सिद्ध्यंतरमाह॥ भुवनज्ञानं सूर्ये संयमात्॥२७॥
सूर्ये प्रकाशमये यः संयमं करोति॥ तस्य सप्तसु भूर्भुवःस्वः प्रभृतिषु लोकेषु यानि
भुवनानि तत्र संनिवेशभांजि पुराणि तेषु यथावदस्य ज्ञानमुत्पद्यते॥ पूर्वस्मिन्सूत्रे

२६ सात्विकप्रकाशरूपालंबनतयोक्ताः॥ इह तु भौतिक इति विशेषः॥ भौतिकप्रकाशालंबन
द्वारेणैव सिद्ध्यंतरमाह॥ चंद्रे ताराव्यूहज्ञानं॥२८॥ ताराणां ज्योतिषां व्यूहः विशिष्टः
सन्निवेशः तस्मिंश्चंद्रे कृतसंयमस्य ज्ञानमुत्पद्यते॥ सूर्यप्रकाशेन हततेजस्कत्वात्ता
राणां सूर्ये संयमात्तत् ज्ञानं शक्नोति भवितुमिति पृथगयमुपायोऽभिहितः॥ सिद्ध्यंत
रमाह॥ ध्रुवे तद्गतिज्ञानं॥२९॥ ध्रुवे निश्चले ज्योतिषां प्रधाने कृतसंयमस्य तारा
णां या गतिः प्रत्येकं नियतकाला नियतदेशा च तस्यां ज्ञानमुत्पद्यते॥ इयं ताराऽयं
ग्रह इयता कालेनेमं राशिमिमं नक्षत्रं यास्यतीति सर्वं जानातीत्यर्थः इदं कालज्ञानमस्य
फलमित्युक्तं भवति॥ बाह्याः सिद्धीः प्रतिपाद्यांतराः प्रतिपादयितुमाह॥ नाभिचक्रे काय
व्यूहज्ञानं ३० शरीरमध्यवर्ति नाभिसंज्ञकं यत्षोडशारं चक्रं तस्मिन्कृतसंयमस्य योगि
नः कायगतो योऽसौ व्यूहो विशिष्टः रसमलधातुनाड्यादीनामवस्थानं तत्र ज्ञानमुत्प
द्यते॥ इदमुक्तं भवति॥ नाभिचक्रं शरीरस्य मध्यवर्ति सर्वतः प्रसृतानां नाड्यादीनां मू
लभूतं अतस्तत्र कृतावधानस्य समग्रः सन्निवेशो यथावदाभाति॥ सिद्ध्यंतरमाह॥ कं
ठकूपे क्षुत्पिपासानिवृत्तिः॥३१॥ कंठे गले कूपः कंठकूपः जिह्वायाः मूलं जिह्वातंतो

२६

रध्वस्तात्कूपवद्रूपः गर्तीकारः प्रदेशः प्राणादेर्यत्संस्पर्शात्क्षुत्पिपासादयः प्रादुर्भवं।
ति॥ तस्मिन्कृतसंयमस्य योगिनस्तेनासिपासादयो निवर्त्तते घंटिकाधस्तान्तुस्त्रोत
सा धार्यप्राणो तस्मिन्भाविते भवत्येव विध्यासिद्धिः सिद्ध्यंतरमाह॥ कूर्मनाड्यां
स्थैर्यं॥३१॥ कंठकूपस्याधस्तात्कूर्माख्या नाडी तस्यां कृतसंयमस्य चित्तस्य स्थै
र्यमुत्पद्यते॥ तस्यास्तमनुप्रविष्टस्य चंचलता न भवती त्यर्थः॥ यदि वा कायस्थैर्य
र्यमुत्पद्यते॥ तेन तकेन चित्स्पंदयितुं शक्यत इत्यर्थः॥ सिद्ध्यंतरमाह॥ मूर्द्धज्यो
तिषि सिद्धदर्शनं॥३३॥ शिरःकपाले ब्रह्मरंध्राख्यं छिद्रं प्रकाशाधारत्वात्॥
ज्योतिर्यथा गृहाभ्यंतरस्थस्य मणेः प्रसरंति प्रभा कुंचिकाविवरप्रदेशे संघटते
तथा हृदयस्थः सात्त्विकः प्रकाशः प्रसृतस्तत्र संपिंडितत्वं भजते। तत्र कृतसंयमस्य
ये द्यावापृथिव्योरंतरालवर्त्तिनः सिद्धाः दिव्याः पुरुषाः तेषामितरप्राणिभिर
दृश्यानां तस्य दर्शनं भवति॥ तान्स पश्यति तैश्च स संभाष्यत इत्यर्थः॥ सर्वज्ञत्वे उपायमा
ह॥ प्रातिभाद्वा सर्वं॥३४॥ निमित्तानपेक्षं मनोमात्रजन्यमविसंवादिकं झगिति सुत्पद्यमानं ज्ञा

नेषात्तंतस्यां संयमेक्रियमाणे प्रातिभं विवेकख्यातेः पूर्वभावि तारकं ज्ञानं उदेति॥ यथोदि
ष्यतः सवितुः पूर्वं प्रभा प्रादुर्भवति तद्विवेकख्यातेः पूर्वं तारकं सर्वविषयं ज्ञानमाविर्भव
२७ ति॥ तस्मिन्सति संयमांतरानपेक्षः सर्वं जानातीत्यर्थः॥ सिद्ध्यंतरमाह॥ हृदये चित्तसंवित्॥
३५॥ हृदयं शरीरस्य प्रदेशविशेषस्तस्मिन्सति संयमांतरानपेक्षः सोन्निध्योमुखस्वल्पपु
ण्डरीकाभ्यंतरेंऽतःकरणसत्वस्य स्थानं तत्र कृत संयमस्य स्वपरचित्तज्ञानमुत्पद्यते
स्वचित्तगताः सर्वाः वासनाः परचित्तगतांश्च रागादीन् जानातीत्यर्थः॥ सिद्ध्यंतरमाह॥ स
त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषाद्भोगः परार्थात्स्वार्थसंयमात्पुरुषज्ञानं ३६
सत्वं प्रकाशसुखात्मकः प्राधानिकः परिणामविशेषः पुरुषो भोक्ताधिष्ठातृरूपः तयोर्भो
ग्यभोक्तृस्वरूपत्वाच्च चेतनाचेतनत्वाच्चात्यंतासंकीर्णत्वं भिन्नत्वमित्यर्थः॥ तयोर्यः प्रत्य
यस्याविशेषो भेदेनाप्रतिभासनं तस्मात्सत्वस्यैव कर्तृतापसायां सुखदुःखसंवित् भोगः
स सत्वस्य स्वात्मनैरपेक्ष्येण परार्थः पुरुषार्थः तस्मादन्यो यः स्वार्थः पुरुषस्वरूपमात्रा
लंबनपरित्यक्ताहंकारसत्वे चिच्छायासंक्रांतिस्तत्र कृतसंयमस्य पुरुषविषयं ज्ञानमुत्प
द्यते॥ तदेवं रूपं स्वालंबनं ज्ञानं सत्वनिष्ठं पुरुषो जानाति न पुनः पुरुषो ज्ञाता ज्ञातस्य वि

ति

षयभावमापद्यते ज्ञेयत्वापत्तेः ज्ञातृज्ञेययोश्च संतत विरोधात्. अस्यैव संयमस्य फलमाह॥
ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायंते॥३७॥ ततः पुरुषसंयमादभ्यस्यमानात् उ
त्थितस्यापि ज्ञानानि जायंते॥ तत्र प्रातिभं पूर्वोक्तं ज्ञानं तस्याविर्भावात् सूक्ष्मादिकमर्थं पश्य
ति श्रावणं श्रोत्रेंद्रियजं ज्ञानं तस्मात् प्रकृष्टाद्दिव्यं दिविभवं शब्दं जानाति। वेदना स्पर्शेंद्रि
यजं ज्ञानं वेद्यतेऽनयेति कृत्वा तांत्रिक्या संज्ञया व्यवह्रियते तस्मात् दिव्यस्पर्शविषयं ज्ञान
मुत्पद्यते॥ आदर्शश्चक्षुरिंद्रियजं ज्ञानं आसमंताद्दृश्यतेऽनुभूयते रूपमनेनेति कृत्वा तत् ^ स्य प्रकर्षाद्दिव्यं रूपज्ञानमुत्पद्यते
॥स्मिन्प्रकृष्टे दिव्ये रसे संविदुपजायते वार्ता गंधसंवित्तिः वृत्तिशब्देन तांत्रिक्या परिभाष
या घ्राणेंद्रियमुच्यते॥ वर्तते गंधविषयइति कृत्वा वृत्तेः घ्राणेंद्रियाज्जाता वार्ता गंधसंवि
त्तिः तस्यां प्रकृष्यमाणायां दिव्यो गंधोऽनुभूयते॥ एतेषां फलविशेषाणां विषयविभागमा
ह॥ ते समाधावुपसर्गा व्युत्थाने सिद्धयः॥३८॥ ते प्राक्प्रतिपादिताः फलविशेषाः समाधेः प्रक
र्षं गच्छतः उपसर्गा उपद्रवाः विघ्नकारिणः तत्र हर्षविस्मयादिकरणेन समाधिः शिथिली
भवति व्युत्थाने पुनर्व्यवहारदशायां विशिष्टफलदायकत्वात् सिद्धयो भवंति॥ सिद्ध्यंतरमाह॥
बंधकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः॥३९॥ व्यापकत्वादात्मचि

आस्वादो रसनेंद्रियजं ज्ञानं आस्वाद्यतेऽनेनेति कृत्वा त

तयोर्नियतकर्मवशादेव शरीरांतर्गतयोरेव भोक्तृभोग्यभावेन यत्संवेदनमुपजायते स
एव शरीरबंध इत्युच्यते॥ तद्यदा समाधिवशात् बंधकारणं धर्माधर्माख्यं कर्म शिथि

लं भवति॥ तानवमापद्यते चित्तस्य च यायोसौ प्रचारो हृदयप्रदेशादिंद्रियद्वारेण विष
याभिमुख्येन सह प्रसरस्तस्य संवेदनं ज्ञानं इयं चित्तवहा नाडी अनया चित्तं वहति इयं च
रसंचारद्वारेण प्रविप्राणादि वहाभ्यो नाडीभ्यो विलक्षणा इति स्वपरशरीरयोर्यदा संचा
रं जानाति तदा परकीयं शरीरं मृतं जीवच्छरीरं वा चित्तसंचारद्वारेण प्रविशति चित्तं च पर
शरीरे प्रविशदिंद्रियाण्यनुवर्तते मधुकरराजमिव मधुमक्षिकाः ततः परशरीरं प्रविष्टो
योगी स्वशरीरवत्तेन व्यवहरति यतो व्यापकयोश्चित्तपुरुषयोर्भोगसंकोचे कारणं क
र्मी भूत्तच्चे समाधिना क्षिप्तं तदा स्वातंत्र्यात्सर्वत्रैव भोगनिष्पत्तिः॥ सिद्ध्यंतरमाह॥ उदानज
याज्जलपंककंटकादिष्वसंग उत्क्रांतिश्च॥ समस्तानामिंद्रियाणां तुषाज्वालावत्
या युगपदुत्थिता वृत्तिः सा जीवनशब्दवाच्या तस्याः क्रियाभेदात्प्राणापानादिसंज्ञाभि
र्व्यपदेशः तत्र हृदयान्मुखनासिकादिद्वारेण वायोः प्रणयनात्प्राण इत्युच्यते॥ नाभिप्रदे
शात्पादांगुष्ठपर्यंतमपनयनादपानः नाभिप्रदेशं परिवेष्ट्य समंता सादांगुष्ठपर्यंतनयना

समानः हृत्कण्ठादिकप्रदेशादाशिरोवृत्तेरुन्नयनादुदानः व्याप्यनयनात्सर्वशरीरव्यापी
व्यानः उदानस्य संयमद्वारेण जयादितरेषां वायूनां निरोधादूर्ध्वगामित्वेन जले महान
द्यादौ महति वा कर्दमे तीक्ष्णेषु कंटकेषु वा न सज्जते तिललघुत्वात्तूलपिंडवज्जलादौ मज्जयित्वा
प्युद्भवतीत्यर्थः सिद्ध्यंतरमाह॥ समानजयात्प्रज्वलनं ४१॥ अग्निमावेष्ट्य व्यवस्थितस्य स
मानाख्यस्य वायोर्जयात्संयमेन वशीकारात् निरावरणस्याग्नेरुद्भूततेजसा ज्वलन्नि
व योगी प्रतिभातीति सिद्ध्यंतरमाह॥ श्रोत्राकाशयोः संबंधसंयमाद्दिव्यं श्रोत्रं॥ ४२॥ श्रोत्रं श
ब्दग्राहकमहंकारिकमिंद्रियं आकाशं व्योम शब्दतन्मात्रकार्यं तयोः संबंधो देशदेशिभा
वलक्षणः तस्मिन्कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्तते युगपत्सूक्ष्मव्यवहितविप्र
कृष्टशब्दग्रहणसमर्थं भवतीत्यर्थः॥ सिद्ध्यंतरमाह॥ कायाकाशयोः संबंधसंयमा
ल्लघुतूलसमापत्तेश्चाकाशगमनं ४३॥ कायः पांचभौतिकं शरीरं तस्याकाशेन योऽव
काशदानात्संबंधस्तत्र संयमं विधाय लघुनि तूलादौ समापत्तिं तन्मयीभावलक्ष
णां विधाय प्राप्तोत्पन्नलघुभावो योगी प्रथमं यथारुचि संचरन् क्रमेणोर्णनाभितं
तुजालेन संचरमाणः आदित्यरश्मिभिश्च विहरन् यथेष्टमाकाशेन गच्छति॥ सिद्ध्यंतर

माह॥ बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः ४४॥ शरीराद्बहिर्या
मनसः शरीरनैरपेक्ष्येण वृत्तिः सा महाविदेहा नाम विगतशरीराहंकारदार्ढ्यद्वा
रेणोच्यते॥ ततः तस्यां कृतात्संयमात्प्रकाशावरणक्षयः सात्त्विकस्य चित्तस्य यः प्र
काशस्तस्य यदावरणं क्लेशकर्मादि तस्य क्षयः प्रविलयो भवति॥ अयमर्थः शरीरा
हंकारे सति या मनसो बहिर्वृत्तिः सा कल्पितेत्युच्यते॥ यदा पुनः शरीराहंकारभावं प
रित्यज्य स्वातंत्र्येण मनसो वृत्तिः साऽकल्पिता तस्यां संयमाद्योगिनः सर्वे चित्तमलाः
क्षीयंते॥ तदेवं पूर्वान्तविषयाः अपरान्तविषयाः मध्यभवाश्च सिद्धीः प्रतिपाद्यानंत
रं भुवनज्ञानादिरूपा बाह्याः कायव्यूहादिरूपा आभ्यंतराः परिकर्मनिष्पन्नभूताः
मैत्र्यादिषु बलानीत्येवमाद्याः समाध्युपयोगिनीः अंतःकरणादीन्द्रियभवाः प्राणादिवा
युसिद्धीश्चित्तदार्ढ्याय समाधौ समाश्वासोत्पत्तये प्रतिपाद्येदानीं स्वदर्शनोपयोगिस
बीजनिर्बीजसमाधिसिद्धये विविधोपायप्रदर्शनायाह॥ स्थूलस्वरूपसूक्ष्मान्वया
र्थवत्त्वसंयमाद्भूतजयः ॥४५॥ पंचानां पृथिव्यादीनां भूतानां पंचावस्था विशेषरूपा

३म

धर्माः स्थूलत्वादयस्तत्र कृतसंयमस्य भूतजयो भवति॥ भूतानि वश्यान्यस्य भव-
न्तीत्यर्थः तथाहि भूतानां परिदृश्यमानं विशिष्टाकारवद्रूपं स्थूलं रूपं स्वरूपं चै-
षां यथाक्रमं कार्कस्यस्नेहोष्णताप्रेरणावकाशदानलक्षणा सूक्ष्मं च यथाक्रमं
भूतानां कारणत्वेन स्थितानि तन्मात्राणि अन्वयिनो गुणाः प्रकाशप्रवृत्तिस्थि-
तिरूपतया सर्वत्रैवान्वयित्वेन समुपलभ्यंते अर्थवत्त्वं तेष्वेव गुणेषु भोगाप-
वर्गसंपादनाख्या शक्तिः तदेवं भूतेषु पंचसूक्तधर्मलक्षणावस्थाभिन्नेषु प्रत्यवस्थं
संयमं कुर्वन्योगी भूतजयी भवति॥ तद्यथा प्रथमं स्थूलरूपसंयमं विधाय तदनु सू-
क्ष्मरूप इत्येवं क्रमेण तस्य कृतसंयमस्य संकल्पानुविधायिन्यो वत्सानुसारि-
ण्य इव गावो भूतप्रकृतयो भवंति॥ तस्यैव भूतजयस्य फलमाह॥ ततोऽणिमा-
दिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च॥ ४५॥ अणिमा परमाणुरूपापत्तिः म-
हिमा महत्वं लघिमा तूलपिंडवल्लघुत्वप्राप्तिः गरिमा गुरुत्वप्राप्तिरंगुल्यग्रेण
चंद्रादिस्पर्शनशक्तिः प्राकाम्यमिच्छानभिघातः शरीरांतःकरणेश्वरत्वमीशित्वं

सर्वत्रप्रभविष्णुत्वं वशित्वं सर्वाण्येव भूतानि अनुगामित्वात्तदुक्तं नातिक्रामं
ति यत्रकामावसायो यस्मिन्विषये यथास्य कामः स्वेच्छा भवति तस्मिन्विष
ययोगिनोवसायो भवति तं विषयं स्वीकारे द्वारेणाभिलाषसमाप्तिपर्यंतं
नयतीत्यर्थः त एते ऽणिमाद्याः समाध्युपयोगिनो भूतजयादस्य प्रादुर्भव
ति॥ यथा परमाणुत्वप्राप्ते वज्राकानप्यतः॥ ४०॥ प्रविशति एवं सर्वत्र योज्यं
एते चाणिमादयोऽष्टौ गुणा महासिद्धय इत्युच्यंते॥ कायसंपदक्षमाणा लक्ष
णा ता प्राप्नोति तद्धर्मानभिघातश्च तस्य कायस्य पथ्वमी रूपादयस्तेषामनभि
घातो नाशो नास्य कुतश्चिदपि भवति॥ नास्य रूपमग्निर्दहति न च वायुः शोषय
तीत्यादि योज्यं॥ कायसंपदमाह॥ रूपलावण्यबलवसंहननत्वादीनि काय
संपत्॥ ४१॥ रूपलावण्यबलानि प्रतिसिद्धानि वज्रसंहननत्वं वज्रवत्कठिना
संहतिरस्य शरीरे भवतीत्यर्थः इति कायस्याविर्भूततद्गुणा संपत् एवं भूत
जयमभिधाय प्राप्तिभूमिकस्येंद्रियजयमाह॥ ग्रहणस्वरूपास्मितान्व

पार्थवत्वसंयमादिंद्रियजयः॥४८॥ ग्रहणमिंद्रियाणां विषयाभिमुखी वृत्तिः।
स्वरूपं सामान्येन प्रकाशकत्वं अस्मिताहंकारानुगमः अन्वयार्थवत्त्वे च पूर्व
वदुक्ते तेषामिंद्रियाणामवस्थापंचके पूर्ववत्संयमं कृत्वा इंद्रियजयी भवति॥
तस्य फलमाह॥ ततो मनोजवित्वं विकरणभावः प्रधानजयश्च॥४९॥ शरी
रस्य मनोवदनुत्तमो गतिलाभो मनोजवित्वं कायनिरपेक्षाणामिंद्रियाणां वृत्ति
लाभो विकरणभावः सर्ववशित्वं प्रधानजयः। एताः सिद्धयो जितेंद्रियस्य प्रादु
र्भवंति ताश्चास्मिन् शास्त्रे मधुप्रतीका इत्युच्यंते॥ यथा मधुन एकदेशोऽपि स्वदते त
था प्रत्येकमेताः सिद्धयः स्वदंते इति मधुप्रतीकाः। इंद्रियजयमभिधायांतःकरण
जयमाह॥ सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृ
त्वं च॥५०॥ तस्मिन् शुद्धे सात्त्विके परिणामे कृतसंयमस्य या सत्त्वपुरुषयोरुत्प
द्यते विवेकख्यातिर्गुणानां कर्तृत्वाभिमानशिथिलीभावस्वरूपा तन्माहात्म्यात्त

त्रैवावस्थितस्य योगिनः सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च समाधिर्भवति॥ स
त्वैषां गुणानां परिणममानानां भावानां स्वामिवदाक्रमणां सर्वभावाधिष्ठातृत्वं तेषा
मेव च शांतोदिताव्यपदेश्यधर्मित्वेन स्थितानां यथावद्विवेकजं ज्ञानं सर्वज्ञातृत्वं
तेषां चास्मिन् शास्त्रे परस्यां वशीकारसंज्ञायां प्राप्तायां विशोका नाम सिद्धिरि
त्युच्यते॥ क्रमेणाभूमिकांतरमाह॥ तद्वैराग्यादपि दोषबीजक्षये कैवल्यं॥५१॥
तस्यामपि विशोकायां सिद्धौ यद्वैराग्यमुत्पद्यते योगिनस्तदा तस्माद्दोषाणां
रागादीनां यद्बीजमविद्या तस्याः क्षये निर्मूलने कैवल्यमात्यंतिकी दुःखनिवृ
त्तिः पुरुषस्य गुणानामधिकारपरिसमाप्तेः स्वरूपनिष्ठत्वं वा अस्मिन्नेव समा
धौ स्थितस्योपायमाह॥ स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसंगा
त्॥५२॥ चत्वारो योगिनो भवंति तत्राभ्यासवान् प्रवृत्तमात्रज्योतिः प्रथमः ऋतं
भरप्रज्ञो द्वितीयः भूतेंद्रियजयी तृतीयः अतिक्रांतभावनीयश्चतुर्थः तस्य च

तुर्यस्यसमाध्याविर्भूतसत्त्वविषयप्रांतभूमिकस्यांत्यामधुमतीसंज्ञांभूमिकां
साक्षात्कुर्वतःस्थानिनोदेवाउपनिमंत्रयितारोभवंतिदिव्यस्त्रीरसायनादिक
मुपकल्पयंतीतितस्मिन्नुपनिमंत्रणेनानेनसंगःकर्तव्यो।नापिस्मयःसंकँशे र
पुनर्विषयभोगेपततिस्मयकरणेकृतकृत्यमात्मानंमन्यमानोनसमाध्यावु
त्सहतेऽतःसंगस्मययोरस्तेनवर्जनंकर्तव्यंरूपस्यामेवफलभूतायां।
विवेकख्यातौपूर्वोक्तसंयमव्यतिरिक्तमुपायांतरमाह॥क्षणतत्क्रमयोः
संवंधसंयमाद्विवेकजंज्ञानं॥५३॥क्षणाःसर्वास्यःकालावयवस्तस्यक
लाःप्रविभक्तुंनशक्यंतेतथाविधानांक्षणानांयःक्रमःपौर्वापर्यैराम
परिणामस्तत्रसंयमात्प्रागुक्तंविवेकजंज्ञानमुत्पद्यतेऽयमर्थःऽयंका१ वे
लक्षणोऽस्मात्क्षणादुत्तरोयमस्मात्पूर्वइत्येवंविधेक्रमेकृतसंयम
स्यात्यंतसूक्ष्मोपिक्षणक्रमेयदाभवति॥साक्षात्कारस्तदान्यदपिसूक्ष्मंमहदादि

साक्षात्करोति इति विवेकज्ञानोत्पत्तिः अस्यैव संयमस्य विषयविवेकोपक्षेपमाह॥
जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः॥५३॥ पदार्थानां भेदहेत
वो जातिलक्षणदेशा भवन्ति क्वचिद्भेदहेतुर्जातिः॥ यथा गौरियं महिषीयमिति॥
जात्या तुल्ययोर्लक्षणं भेदहेतुः इयं कर्बुरा इयमरुणेति जात्या लक्षणेन चाभि
न्नयो भेदहेतुर्देशो दृष्टः॥ यथा तुल्यपरिमाणयोरामलकयोर्भिन्नदेशस्थितयोः
यत्र पुनर्भेदोऽवधारयितुं न शक्यते यथैकदेशस्थितयोः शुक्लयोः पार्थिवयोः प
रमाण्वोस्तथाविधे विषये भेदाय कृतसंयमस्य यदा भेदेन ज्ञानमुत्पद्यते तदा त
दभ्यासात्सूक्ष्माण्यपि तत्त्वानि भेदेन प्रतिपद्यते इति तदुक्तं भवति॥ यत्र केनचिदुपा
येन भेदो नावधारयितुं शक्यस्तत्र संयमाद्भवत्येव भेदप्रतिपत्तिः ततः सूक्ष्माणां
तत्त्वानां बुद्ध्यादीनां विवेकेन प्रतिपत्तिः उक्तस्य विवेकजन्यज्ञानस्य संज्ञाविषयं
स्वभावं व्याख्यातुमाह॥ तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेक
जं ज्ञानं॥५४॥ उक्तसंयमबलादंत्यायां भूमिकायामुत्पन्नं ज्ञानं तारकमिति तार
यत्यगाधात्संसारपयोधेर्योगिनमित्यन्वर्थिकया संज्ञया तारकमित्युच्यते॥

अस्य विषयमाह॥ सर्वविषयमिति सर्वाणि तत्त्वानि महदादीनि विषयोऽस्येति स
र्वविषयं स्वभावश्चास्य सर्वथाविषयत्वं सर्वाभिरवस्थाभिः स्थूलस्वरूपसू
क्ष्मादिभेदेन तैस्तैश्च परिणामैः सर्वैः प्रकारेणावस्थितानि तत्त्वानि विषयो
ऽस्येति सर्वथाविषयत्वं स्वभावांतरमाह॥ अक्रमं चेति निःशेषनानावस्था
परिणत तात्त्विकभावग्रहणे नास्य क्रमो विद्यते इत्यक्रमं सर्वं करतलाम
लकवद्युगपत्पश्यतीत्यर्थः अस्माच्च विवेकजात्तारकाख्यात्ज्ञानात्किं भ
वतीत्याह॥ सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यं॥५६॥ सत्त्वपुरुषावुक्तलक्ष
णौ तयोः शुद्धिसाम्ये कैवल्यं सत्त्वस्य सर्वथा कर्तृत्वाभिमाननिवृत्त्या स्व
कारणेऽनुप्रवेशः शुद्धिः पुरुषस्य शुद्धिरुपचरितभोगाभावः इति द्वयोः समा
नायां शुद्धौ पुरुषस्य कैवल्यमुत्पद्यते मोक्षो भवतीत्यर्थः॥ तदेवमंतरंगं योगा
गं गत्रयमभिधाय तस्य च संयमसंज्ञां कृत्वा संयमस्य विषयप्रदर्शनार्थं प
रिणामत्रयमुपपाद्य संयमबलोत्पद्यमानाः पूर्वांतापरांतमध्यभवाः सि

77

धीरूपदर्शिसमाध्यभ्यासोत्पत्तये वा ह्यास्तु बह्वीनादिरूपाः अभ्यंतराश्च कायव्
यूहादिरूपाः प्रदर्श्य समाध्युपयोगायेंद्रियप्राणजयादिपूर्विकाः प्रदर्श्य पर
मपुरुषार्थसिद्धये यथाक्रममवस्थासहितभूतयेंद्रियजयसत्वजयोद्भवा
श्च व्याख्याय विवेकज्ञानोत्पत्तये तांस्तानुपायान्यस्य तारकस्य सर्वसमा
ध्यवस्थापर्यंतमवस्वरूपमभिधाय तत्समापत्तेः कृतमिति निर्णीतो विभूति
पादस्तृतीयः इति श्रीमहाराजाधिराजभोजदेवविरचितायां राजमार्तंडा
भिधानायां पातंजलयोगशास्त्रसूत्रवृत्तौ विभूतिपादमुभ्मांस्तृतीयः॥३॥
यदात्मैव कैवल्यं विनोपायैः प्रजायते तमेकमजमीशानं चिदानंदमयं स्तुमः
॥१॥ इदानीं विप्रतिपत्तिसमुत्थभ्रांतिनिराकरणेन युक्त्या कैवल्यस्वरूपावस्था
पनाय कैवल्यपादोयमारभ्यते तत्र याः पूर्वमुक्ताः सिद्धयस्तासां नानाविधं जन्मादि
कारणप्रतिपादनद्वारेणैव बोध्ययति यच्चेताः सिद्धयः पूर्वं जन्माभ्यस्तसमाबला
ज्जन्मादिनिमित्तत्वेनाश्रित्य प्रवर्तते ततश्चानेकभवसाध्यस्य समाधेर्नैक्षतिरस्ती
त्याश्वासोत्पादनाय समधिसिद्धेश्च प्राधान्यख्यापनार्थं कैवल्यप्रयोगार्थं चाह।

धिका
रस्य चित्त
सत्वस्य
स्वकारणे
अनुप्रवेशात्कै
वल्यमुत्प
द्यते इत्यभि
हितम्

जन्मौषधिमंत्रतपःसमाधिजाः सिद्धयः १॥ काश्चनजन्मनिमित्ताएवसिद्धयोप
क्ष्यादीनामाकाशगमनादयः यथावाकपिलमहर्षिप्रभृतीनांजन्मसमानंतरमेवो
पजायमानाज्ञादयः सांसिद्धिकाः गुणाः औषधिसिद्धयोपातालादौरसायनाद्यु
पयोगात् मंत्रजपात्केषांचिदाकाशगमनादि तपःसिद्धिर्यथाविश्वामित्रादी
नांसमाधिसिद्धिर्यथाप्राक्प्रतिपादिताएतासिद्धयः पूर्वजन्मनिक्षपितक्लेशा
णामेवोपजायंते तस्मात्समाधिसिद्धावेवान्यासांसिद्धीनांसमाधिरेवजन्मांतरा
भ्यस्तःकारणं मंत्रादीनिनिमित्तमात्राणि ननुनंदीश्वरादीनांजात्यादिपरिणामोऽ
स्मिन्नेवजन्मनिदृश्यते तत्कथंजन्मांतराभ्यस्तस्यसमाधेः कारणत्वमुच्यतेइ
त्याशंक्याह॥ जात्यंतरपरिणामः प्रकृत्यापूरात् २॥ योयमिहैवजन्मनिनंदीश्व
रादीनांजात्यादिपरिणामः सप्रकृत्यापूरात् पाश्चात्याएवहिप्रकृतयोऽमुष्मि
न्जन्मनिविकारानापूरयन्ति जात्यंतराकारेणपरिणमयंति ननुधर्मादयस्तत्र
क्रियमाणाउपलभ्यंते तत्कथंप्रकृतीनामापूरणेकारणत्वमित्याह॥ निमित्त

मप्रयोजकं प्रकृतीनां॥३॥ निमित्तं धर्मादि तत् प्रकृतीनां ग्रर्थान्तर[illegible]परिणामेन
२५ प्रयोजकं न हि कार्येण कारणं प्रवर्तते कुतस्तर्हि [illegible] दं भापा
र इत्याह॥ वरणभेदस्तु ततः क्षेत्रिकवत्॥४॥ ततस्तस्मादनुष्ठीयमानाद्धर्मा
देर्यदवरणमावरकमधर्मादि तस्यैवावरोधित्वात् भेदः क्षयः क्रियते तस्मि
न्प्रतिबंधके क्षीणे प्रकृतयः स्वयमभिमतकार्याय प्रभवंति॥ दृष्टांतमाह॥ क्षेत्रि
कवत् यथा क्षेत्रिकः कृषीवलः केदारात्केदारांतरं जलं निनीषुर्जलप्रतिबं
धकवरणभेदमात्रं करोति तस्मिन्भिन्ने जलं स्वयमेव प्रसरद्रूपं परिणामं गृ
ह्णाति न तु जलप्रसारणे तस्य कश्चिद्व्यापारः एवं धर्मादेर्बोध्यं यदा साक्षा
त्कृततत्त्वस्य योगिनो युगपत्कर्मफलभोगायात्मीयानिरतिशयविभूत्यनु
नवाय युगपदनेकशरीरनिर्मित्सोपजायते तदा कुतस्त्यानि चित्तानि प्रभवन्ती
त्याह॥ निर्माणचित्तान्यस्मितामात्रात्॥५॥ योगिनः स्वयं निर्मितेषु कायेषु यानि

चित्तानि तानि मूलकारणात् अस्मितामात्रादेव तदिच्छया प्रसरंति अ
ग्नेर्विस्फुलिंगा इव युगपत्परिणमंति ननु बहूनां चित्तानां भिन्नाभिप्रायत्वान्नैक
कर्तृत्वं स्यादित्यत आह॥ प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषां॥५॥ चेतसां प्र
वृत्तिभेदे व्यापारनानात्वे एकं योगिनश्चित्तं प्रयोजकं प्रेरकं अधिष्ठातृत्वेन तेन
न भिन्नमतत्वं अयमर्थः यथा स्वकीये शरीरे मनश्चक्षुःपाण्यादीनि यथेच्छं प्रेरयति
अधिष्ठातृत्वेन तथा कायान्तरेष्वपीति जन्मादिप्रभवत्वात् सिद्धानां चित्तमपि
तत्प्रभवं पञ्चविधमेव ततो जन्मादिप्रभवाच्चित्तात् समाधिप्रभवस्य वैलक्षण्य
माह॥ तत्र ध्यानजमनाशयं॥६॥ ध्यानजं समाधिजं यच्चित्तं तत्पंचसु मध्येऽनाश
यं कर्मवासनारहितमित्यर्थः यथेतरचित्तेभ्यो योगिनश्चित्तं क्लेशादिरहितं विलक्ष
णं तथा कर्मापि विलक्षणमित्याह॥ कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषां
शुभफलदं कर्म यागादि शुक्लं अशुभफलदं ब्रह्महत्यादि कृष्णं उभयं संकीर्णं शु
क्लकृष्णं तत्र शुक्लं कर्म विचक्षणानां दानतपःस्वाध्यायादिमतां पुरुषाणां क

ष्णं कर्म नारकीयाणां शुक्लकृष्णं मनुष्याणां योगिनां तु संन्यासवतामेवं विधं कर्मक्षय
मायां तत्फलत्यागानुसंध्यानेनैवानुष्ठानान्न किंचित्फलमारभते अस्यैव कर्म
णः फलमाह॥ ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां॥८॥ इह हि
द्विविधाः कर्मवासनाः स्मृतिमात्रफलाः जात्यायुर्भोगफलाश्च तत्र जात्यायुर्भोग
फला एकानेकजन्मभवा इत्यनेन पूर्वमेव कृतनिर्णया या या स्मृतिमात्रफला
स्तासु ततो निर्वर्तकात्कर्मणो यादृक्शरीरमारब्धं देवमनुष्यतिर्यगादिभे
देन तस्य विपाकस्य या अनुगुणा अनुरूपा वासनास्तासामेव तस्मादभिव्य
क्तिर्वासनानां भवति अयमर्थः। येन कर्मणा पूर्वं देवतादिशरीरमारब्धं जा
त्यन्तरशतव्यवधानेन पुनस्तथाविधस्यैव शरीरस्यारंभे तदनुकूलरूपा एव
स्मृतिफला वासनाः प्रकटीभवंति। लोकोत्तरेष्वेवार्थेषु तस्य स्मृत्यादयो जा
यंते॥ इतरास्तु सत्योप्यव्यक्तसंज्ञास्तिष्ठन्ति न तस्यां दशायां नारकादि शरी
रस्योपभोगभवा वासनाव्यक्तिमायांति॥ आसां वासनानां कार्यकारण
भावानुपपत्तिमाशंक्य समर्थयितुमाह॥ जातिदेशकालव्यवहितानामप्यानन्त

र्यं स्मृतिसंस्कारयोरेकरूपत्वात् ॥९॥ इह नानायोनिषु भ्रमतां संसारिणां
कांचिद्योनिमनुभूय यदा योन्यंतरसहस्रव्यवधानेन पुनस्तामेव योनिं प्र
तिपद्यते ॥ तदा तस्यां पूर्वानुभूतायां योनौ तथाविधशरीरादिव्यंजकापेक्ष
या वासनाः प्रकटीभूता आसन् तास्तथाविधव्यंजकाभावात्तिरोभूताः पुनस्त
थाविधव्यंजकशरीरादिलाभे प्रकटीभवंति जातिदेशकालव्यवधानेपि ता
स्वानुरूप सां स्मृत्यादिफलसाधने आनंतर्यं नैरंतर्यमेव कुतः स्मृतिसंस्कारयोरेकरू
पत्वात् ॥ तथाहि अनुष्ठीयमानात्कर्मणश्चित्तसत्वे वासनारूपः संस्कारः समुत्प
द्यते स च स्वर्गनरकादीनां फलानामंकुरीभावः कर्मणां वा यागादीनां शक्तिरूपत
यावस्थानं कर्तुर्वा तथाविधभोगभोक्तृत्वरूपं सामर्थ्यं ॥ ततः संस्कारात्स्मृतिः स्मृते
श्च सुखदुःखोपभोगस्तदनुभवाच्च पुनरपि संस्कारस्मृत्यादयः ॥ एवं च सति स्मृ
तिसंस्कारादयो भिन्नास्तस्यानंतर्याभावो दुर्लभः कार्यकारणभावः अस्माकं तु
यदानुभव एव संस्कारो भवति संस्कारश्च स्मृतिरूपतया परिणमते तदैकस्यैव

श्री

36 चित्तस्यानुसंधातृत्वेनान्वितत्वात्कार्यकारणभावो न दुर्घटो भवति एकं त्वानंत
र्ये कारणभावश्चेद्वासनानां यदा तु प्रथममेवानुभवः प्रवर्त्तते तदा किं वासना
निमित्तक उतानिमित्तक इति शंकामपनेतुमाह ॥ तासामनादित्वमाशिषो नित्य
त्वात् ॥ १० ॥ तासां वासनानामनादित्वं न विद्यते आदिर्यासां तासां भावस्तत्त्वं आ
सामादिर्नास्तीत्यर्थः कुत इत्यत आह ॥ आशिषो नित्यत्वात् ॥ येयमाशीर्मोहरूपा
सदैव सुखसाधनानि मे भूयासुर्मा कदाचन तैर्वियोगो मम भूयादिति यः संक
ल्पविशेषो वासनानां कारणं तस्य नित्यत्वादनादित्वमित्यर्थः एतदुक्तं भवति ।
कारणस्यासन्निहितत्वात् अनुभवसंस्कारादीनां कार्याणां प्रवृत्तिः केन वार्य
ते अनुभवसंस्काराद्यनुविद्धं संकोचविकाशधर्मि चित्तं तदभिव्यंजकविपाक
लाभात् तत्फलरूपतया परिणमत इत्यर्थः आसामानंत्याद्धानं कथं संभवती
त्याशंक्य हानोपायमाह ॥ हेतुफलाश्रयालंबनैः संगृहीतत्वादेषामभावे तदभावः मा
॥ ११ ॥ वासनानामनंतरानुभवो हेतुः तस्यानुभवस्य रागादयस्तेषामविद्येत

साक्षात्पारंपर्येण च हेतुः फलं शरीरादि स्मृत्यादयश्च आश्रयो बुद्धिसत्त्वं आ॰
लंबनपदेनानुभवस्य तदेव वासनानां अतस्तैर्हेतुफलाश्रयालंबनैरनंतानाम
पि वासनानां संगृहीतत्वादेषां हेत्वादीनामभावे ज्ञानयोगाभ्यां दग्धबीजकल्पत्वे
विहिते निर्मूलत्वान्न वासनाः प्ररोहंति न कार्यमारभंत इति तासामभावः नन्वत्र प्रति
क्षणं चित्तस्य नश्वरत्वोपलब्धेर्वासनानां तत्फलानां च कार्यकारणभावेन युगप
दभावित्वान्नदेकधर्मैकत्वमित्याशंक्य एकत्वसमर्थनायाह॥ अतीतानागतं
स्वरूपतोस्त्यध्वभेदाद्धर्माणाम्॥१२॥ इहात्यंतमसतां भावानामुत्पत्तिर्न युक्तिमती
तेषां सत्त्वसंबंधायोगात् नहि शशविषाणादीनां क्वचिदपि सत्त्वसंबंधो दृष्टः॥ नि
रुपाख्ये च कार्ये किमुद्दिश्य कारणानि प्रवर्तेरन् नहि विषयमनालोच्य कश्चित्प्र
वर्तते सतामपि विरोधान्नाभावसंबंधोस्ति यत्स्वरूपेणालब्धसत्ताकं तत्कथं नि
रुपाख्यतामभावरूपतां भजते। न विरुद्धरूपं स्वीकरोतीत्यर्थः तस्मात्सतामभावा
संभवादसतां चोत्पत्त्यसंभवात् तैस्तैर्धर्मैर्विपरिणममानो धर्मी सदैकरूपतया

वर्तिष्यते ध्वमास्तु अव्याविकत्वेन व्यवस्थिता स्वस्मिन्नध्वनि व्यवस्थिता न स्वरूपं त्यजं-
37 ति वर्तमाने ध्वनि व्यवस्थिताः केवलं भोग्यतां भजंते तस्माद्धर्मीणामतीतानागता
ध्वभेदात्ततेनैव च रूपेण कार्यकारणभावोस्मिन् दर्शने प्रतिपाद्यते तस्मादप
वर्गपर्यंतमेव चित्तं धर्मितया न वर्तमानं न निन्होतुं पार्यते ते तरु ते धर्मधर्मिणाः किं
रूपा इत्यत आह॥ ते व्यक्तसूक्ष्मा गुणात्मानः॥१३॥ ०परा ते धर्मधर्मिणाः प्रोक्तास्ते
व्यक्तसूक्ष्मभेदेन व्यवस्थिताः ये गुणाः सत्वरजस्तमोरूपास्तदात्मानस्तत्स्वभावा
स्तत्परिणामरूपा इत्यर्थः अतः सत्वरजस्तमोभिः सुखदुःखमोहरूपैः सर्वी सां
बाह्याभ्यंतरभेदभिन्नानां भावव्यक्तीनामनुयानुगमो दृश्यते यद्यदन्वयितत्तत्प
रिणामरूपं दृष्टं यथा घटादयो मृदान्विताः मृत्परिमाणरूपाः यद्येते त्रयो गुणाः
सर्वत्र मूलकारणं कथमेको धर्मीति व्यपदेश इत्याशंक्याह॥ परिणामैकत्वाद्व
स्तुतत्वं॥१४॥ यद्यपि त्रयो गुणास्तथापि तेषामंगांगिभावगमनलक्षणो यः परि
णामः क्वचित्सत्वमंगि क्वचिद्रजः क्वचित्तम इत्येवंरूपस्तस्यैकत्वाद्वस्तुनस्तत्वम

कमुच्यते यथा इयं पृथिवी अयं वायुरित्यादि नतु विज्ञानव्यतिरिक्ते सर्वथैव वस्त्वे
कमनेनावक्तुं युज्यते यदा विज्ञानमेव वासनावशात् कार्यकारणभावेनावस्थि
तं यथा तथा च भाति तत्कथमेतदुच्यते वस्त्वमित्याशंक्याह॥ वस्तुसाम्ये चित्तभे
दात्तयोर्विविक्तः पंथाः ॥१५॥ तयोर्ज्ञानज्ञेययोर्विविक्तः पंथाः विविक्तो मार्ग इति या
वत् कथं वस्तुसाम्ये चित्तभेदात् समाने वस्तुनि स्त्र्यादावुपलभ्यमाने नानाप्रमा
तॄणां चित्तस्य भेदः सुखदुःखमोहरूपतया तदुपलभ्यते तथा ह्येकस्यां रूपला
वण्यवत्यां योषित्युपलभ्यमानायां सरागस्य सुखमुत्पद्यते सपत्न्यास्तु द्वेषः परि
व्राजकादेर्घृणा इत्येकस्मिन्नपि वस्तुनि नानाविधचित्तोदयात् कथं चित्तकार्यत्वं
वस्तुनः एकचित्तकार्यत्वे वस्त्वेकरूपतयैवावभासेत॥ किंच चित्तकार्यत्वे वस्तु
नो यदा यस्य चित्तस्य तद्वस्तु कार्यं तस्मिन्नर्थान्तरव्यासक्ते चित्ते तद्वस्तु न किंचित्स्या
त्॥ भवत्विति चेत् न तदेव कथमन्यैर्बहुभिरुपलभ्येत उपलभ्यते च तस्मान्न

चित्तकार्ये। अथ युगपद्बहुभिः सोऽर्थः क्रियते तदा बहुभिर्निर्मितस्यार्थस्यैक
निर्मिताद्वैलक्षण्यं स्यात्। यदि वैलक्षण्यं नेष्यते तदा कारणभेदे सति कार्यभेद
78 स्याभावे निर्हेतुकमेकरूपं वा जगत् स्यात्। ए० तदुक्तं भवति सत्यपि भिन्ने कारणे
यदि कार्याभेदस्तदा समग्रं जगन्नानाविधकारणजन्यमेकरूपं स्यात्। का
रणाभेदाननुगमात् स्वातंत्र्ये निर्हेतुकं स्यात्। यद्येवं कथं तेन त्रिगुणात्मनार्थेन ए
कस्यैव प्रमातुः सुखदुःखमोहमयानि ज्ञानानि जन्यंते। मैवं यथार्थस्त्रिगुणा
स्तथा चित्तमपि त्रिगुणं यस्य चित्तस्यार्थप्रतिभासोत्पत्तौ धर्मादयः सहकारिणस्तां
तदुद्भवाभिभववशात् कदाचित्तस्य तेन तेन रूपेणाभिव्यक्तिः। तथा च कामुकस्य
सन्निहितायां योषिति धर्मसहकृतं चित्तं सत्त्वस्यांगितया परिणममानं सुखम
यं भवति तदेवाधर्मसहकारि रजसोंगितया दुःखरूपं सपत्नीमात्रस्य भवति ती
व्राधर्मसहकारितया तमसोंगित्वेन कोपनायाः सपत्न्याः मोहमयं भवति। तस्माद्धि

ज्ञानव्यतिरिक्तोऽस्ति वा सोऽर्थः।तदेवं न विज्ञानवस्तुनोस्तादात्म्यविरोधात्नका
कार्यः कारणाभावः।कारणभेदेऽसत्यपि कार्यस्य भेदप्रसंगात् इति ज्ञाना
व्यतिरिक्तत्वमर्थस्य व्यवस्थापितं यद्येवं ज्ञानं चेत्प्रकाशत्वात् ग्रहणस्वभा
वं ग्रर्थश्च प्रकाश्यत्वाद्ग्राह्यस्वभावस्तत्कथं युगपत्सर्वानर्थान्न गृह्णाति न
च स्मरतीत्याशंक्य परिहारं वक्तुमाह॥ तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञा
तं॥१६॥ तस्यार्थस्योपरागादाकारसमर्पणाच्चित्ते वा स्वं वस्तु ज्ञातमज्ञातं च भव
ति ग्रयमर्थः सर्वः पदाग्रात्मज्ञानसामग्रीमपेक्षते नीलादिज्ञानं चोपजायमानम्
इन्द्रियप्रणालिकया समागतमर्थोपरागं सहकारिकारणत्वेनापेक्षते व्यतिरिक्तस्यार्थ
स्य संबंधाभावात् गृहीतुमशक्यत्वात्॥ ततश्च सोऽर्थो ज्ञात इत्युच्यते येनाकारेण स
मर्पितः सो ज्ञातत्वेन व्यवह्रियते यस्मिन्ननुभूतेऽर्थे सदृशादिरर्थः संस्कारसमुद्बोधस्य
सहकारिकारणत्वं प्रतिपद्यते तदैकरूपतया स्वप्रतिपत्त्वेन व्यवस्थितत्वात् सन्नि

ध्याने यदा बुद्धिस्तदाकारतामापद्यते तदा चेतनेवो जायते। बुद्धिवृत्तिप्रतिसंक्रांता
च यदा चिच्छक्ति बुद्धिवृत्त्यावेशात्तथा संवेद्यते तदा बुद्धेः स्वस्यात्मनः वेदनं संवेद
नं भवतीत्यर्थः॥ इत्थं संविदितचित्तं सर्वार्थग्रहणसामर्थ्यात् सकलव्यवहारनिर्वा
हक्षमं भवतीत्याह॥ द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं॥२३॥ द्रष्टा पुरुषस्तेनोप

रक्तं तत्संनिधानेन तद्रूपतामिव प्राप्तं दृश्योपरक्तं गृहीतविषयाकारपरिणा
मं यदा भवति तदा तदेव सर्वार्थग्रहणसमर्थं जायते॥ यथा निर्मलं स्फटिकद
र्पणाद्येव प्रतिबिंबग्रहणसमर्थमेवं रजस्तमोभ्यामनभिभूतं सत्त्वं शुद्धत्वा
च्चिच्छायाग्रहणसमर्थं भवति न पुनरशुद्धत्वाद्रजस्तमसी तदभिभूतरज
स्तमोरूपमंगितया सत्त्वं निश्चलदीपशिखाकारं सदैवैकरूपतया परिणाम
मानं चिच्छायाग्रहणसामर्थ्यादामोक्षप्राप्तेरवतिष्ठते॥ यथायस्कांतसन्नि
धाने लोहस्य चलत्वमाविर्भवति एवं चिद्रूपपुरुषसन्निधाने सत्त्वमभिव्य

ज्यते चैतन्यं॥ अत एवास्मिन् दर्शने द्वे चिच्छक्ती नित्योदिताभिव्यंग्या च नित्योदि
तादिचिच्छक्तिः पुरुषः तत्सान्निध्यानादभिव्यक्तत्वमभिव्यंग्यं चैतन्यसत्वं॥ अभिव्यंग्या
चिच्छक्तिः तदत्यंतसान्नित्वाद् तत्तरंगं पुरुषस्य भोग्यतां प्रतिपद्यते॥ तदेवशांता
ब्रह्मवादिभिः सांख्यैः पुरुषस्य परमात्मनोपि विशेषं कर्मात्मरूं सुखदुःखमो
हे तथा व्यपदिश्यते॥ यत्सत्वसंतानादिकं वादे कस्यापि गुणस्य कदाचित् कस्यचिदं
गित्वात् त्रिगुणां प्रतिक्षणं परिणाममाने सुखदुःखमोहात्मकमनिमित्तं ततस्मिन्क
र्मात्मरूपेऽभ्रे सत्वे स्वाकारसमर्पणाद्वारेण संवेद्यतामापादयति॥ तच्छुद्धमाप्यं
चितसत्वमेकतः प्रतिसंक्रांतचिच्छायामन्यतोगृहीतविषयाकारेण चितेनोप
ढौकितं स्यात् ततस्यामेवावस्थायां दुःखानुभवितृमतोवस्थानानात्वात् तदभिन्नस्यावस्थातोपि
नानात्वं नानात्वेन परिणामित्वात् नात्मत्वं नापि निर्लिप्तत्वं अतएव शांतब्रह्मवादिभिः सांख्यैरा
त्मनः सदैव संसारदशायां चैकरूपत्वमंगीक्रियते येन वेदांतवादिनश्चिदानंदमयत्वमात्मना
गोदेमन्यते तेषामयुक्तः पक्षः न ह्याहि आनंदस्य सुखरूपत्वात् सुखस्य च संवेद्यमानतयैव प्रति
भासात् संवेद्यमानत्वं संवेदनव्यतिरेकेणानुपपन्नमिति संवेदनसंवेद्ययोरभ्युपगमादद्वैतहानिः

कार्यं चित्तं संक्रान्तिबलाच्चेतनायमानं न वास्तवं चैतन्याभावेऽपि सुखदुःखस्वरूपभोगमनुभवति।
स एव भोगोऽत्यन्तसान्निध्येन विवेकाग्रहणाद् भोक्तुरपि पुरुषस्य भोग इति व्यपदिश्यते
अनेनैवाभिप्रायेण विन्ध्यवासिनोक्तं सत्त्वतप्यत्वमेव पुरुषस्य भोक्तृत्वमिति अन्यत्रापि प्र
८१ तिबिंबमानस्योपाधौ तद्रूपच्छायान्तरोद्भवः प्रतिबिंबशब्देनोच्यते एवं सत्त्वेऽपि पौरुषप्रति
च्छायासदृशस्यैवोपविच्छायान्तराभिव्यक्तिः प्रतिबिंबशब्दार्थः ननु प्रतिबिंबनं नाम नि
र्मलस्य नियतपरिमाणस्य निर्मले दृष्टं यथा मुखस्य दर्पणे अत्यन्तनिर्मलस्य व्यापकस्य च उ
रूपस्य तस्मादतिनिर्मले कथं प्रतिबिंबं न उपपद्यते उच्यते प्रतिबिंबनस्य स्वरूपमनवगच्छ
ताभवतेदमभ्यधायि यैव सत्त्वगताया अभिव्यंग्याया चिच्छक्तेः पुरुषस्य सान्निध्याभिव्य
क्तिः प्रतिबिंबनमुच्यते यादृशी पुरुषगतना विकृतिः तच्छायातः प्राप्याविर्भवति यदप्युक्तम
न्तनिर्मलः पुरुषः कथमनिर्मले सत्त्वे प्रतिसंक्रामतीति तदप्यनैकान्तिकं नैर्मल्यादपह
हेऽपि जलादावादित्यादयः प्रतिसंक्रान्ताः समुपलभ्यन्ते यदप्युक्तमनवच्छिन्नस्य नास्ति प्र
तिसंक्रान्ति[रिति तदप्यनुपपन्नं व्यापकस्याप्याकाशस्य दर्पणादौ प्रतिसंक्रान्ति]दर्शनात् एवं सति न काचिदनुपपत्तिः प्रतिबिंबदर्शनस्य ननु सात्त्विकपरिणा

६

मत्पुरुषसन्निधानादभिव्यंग्यायाः चिच्छक्तेर्वा स्वार्थाकारसंक्रान्तो पुरुषस्य सुखदुःखरूपो भोगः इत्यु
क्तं तदनुपपन्नं तदेव चित्तसत्त्वमहत्तत्त्वपरिणतायाः कथं संभवति किमर्थं च तस्याः परिणामः अथोच्य ३
ते पुरुषार्थोपभोगसंपादनतया कर्तव्य अतः पुरुषार्थकर्तव्यतया तस्याः महदादिपरिणामः तदनुपपन्नः
पुरुषार्थकर्तव्यताया एवानुपपत्तेः पुरुषार्थो मया कर्तव्य इत्येवंविधोऽध्यवसायः पुरुषार्थकर्तव्यतो
च्यते जडायाश्च प्रकृतेः कथं प्रथममेवैवंविधोऽध्यवसायः अस्ति चेदध्यवसायः कथं जडत्वं अत्रोच्यते अनु
लोमप्रतिलोमलक्षणपरिणामद्वये सहजं शक्तिद्वयमस्ति तदेव पुरुषार्थकर्तव्यतोच्यते सा च स्वचेतनाया
अपि प्रकृतेः सहजैव तत्र महदादिमहाभूतपर्यन्तोऽस्याः बहिर्मुखतयानुलोमपरिणामः पुनः स्वकार
णानुप्रवेशद्वारेणास्मितान्तः प्रतिलोमः परिणामः इत्थं च पुरुषस्याभोगपरिसमाप्तेः सहजशक्तिद
पत्तयात् कृतार्था प्रकृतिर्न पुनः परिणाममारभते एवंविधायां च पुरुषार्थकर्तव्यतायां जडायाश्चापि प्र
कृतेर्न काचिदनुपपत्तिः ननु यदीदृशी शक्तिः सहैव प्रधानस्यास्ति किमर्थं मोक्षार्थिभिर्मोक्षाय यत्नः
क्रियते मोक्षस्यानर्थनीयत्वेन तदुपदेशशास्त्रस्याप्यानर्थक्यं उच्यते योयं प्रकृतिपुरुषयोरनादिर्भो
ग्यभोक्तृभावलक्षणः संबन्धस्तस्मिन् सति व्यक्तचेतनायाः प्रकृतेः कर्तृत्वाभिमानात् दुःखानुभवे
सति कथमियं दुःखनिवृत्तिरात्यन्तिकी मम स्यादिति भवत्येवाध्यवसायः अतो दुःखनिवृत्त्युपायोपदे
शकशास्त्रोपदेशापेक्षस्त्येव प्रधानस्य तथाभूतमेव च कर्मानुरूपं बुद्धिसत्त्वे शास्त्रोपदेशस्य विषयः

न्या

दृशांनांनरूपत्वमेवंविधत्वाच्चित्तस्वभावः प्रमाणेनाभिधीयते सर्वप्रमाणानां प्रयतमानैरेवंविधस्य चित्तस्यापदे
शं सहकारिणामपेक्षमाणा स्वफलमासादयन्ति सर्वाण्येव च कार्याणि प्रमाणाद्यात्मलाभमात्मानं लभ
ते अस्य च प्रतिलोमपरिणामद्वारेणान्यथास्य प्रमाणस्य कार्यस्य रूपं सामग्री प्रमाणेन निश्चि
ताप्रकारान्तरेणानुपपत्तेः अतस्तां विना कथं भवितुमर्हतीति अतः स्थितमेतत् संज्ञातविषयोपरागम
भिव्यक्तचित्तभावं बुद्धिसत्त्वं विषयानिश्चयद्वारेण समग्रं लोकयात्रां निर्वाहयतीति एवंविधमेव चित्तं
पश्यन्तो भ्रान्ताः स्वसंवेदनं चित्तमात्रं च जगदित्येवं ब्रुवाणाः प्रतिबोधिता भवन्ति ननु यद्येवंविधाद्देव
चित्तात्सकलव्यवहारनिष्पत्तिः कथं प्रमाणशून्यो द्रष्टाभ्युपगम्यत इत्याशंक्य द्रष्टरि प्रमाणमाह
तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात् तदेव चित्तं संख्यातीताभिर्वास
नाभिश्चित्रमपि नानारूपमपि परार्थं परस्य स्वामिनो भोक्तुर्भोगापवर्गलक्षणमर्थं साधयतीति
कुतः संहत्यकारित्वात् संहत्य संभूय मिलित्वार्थक्रियाकारित्वात् यच्च संहत्यार्थक्रियाकारि तत्परा
र्थं दृष्टं यथा शयनासनादि सत्त्वरजस्तमांसि च चित्तलक्षणपरिणामभांजि संहत्यकारीणि अतः प
रार्थानि यश्च परः स पुरुषः ननु चासनतस्मिन्नेवार्थस्फूर्तिरुपजायते इति न सर्वत्र ज्ञाने नापि स
र्वत्र स्फूर्तिरिति न कश्चिद्विरोधः यद्येवं प्रमातापि पुरुषो यस्मिन् काले नीलं संवेदयति न तस्मिन्ने
व काले पीतमतश्चित्तस्यापि कादाचित्कग्रहात्वरूपत्वादाकारग्रहणे परिणामित्वे प्राप्ते इत्याशं
क्य परिहर्तुमाह सदा ज्ञातास्तत्प्रभोः पुरुषस्यापरिणामात् ॥ यास्ता चित्तस्य प्रमाणवि

यथ्ययादिह्पाहृतपस्तास्तत्वभोत्तस्यग्रहीतृः पुरुषस्यसदासर्वकालमेवज्ञेयास्तस्यचितिरूपतयास्व
परिणामात् परिनामित्वाभावादित्यर्थः यद्यसौपरिणामीस्यात्तदापरिणामस्यकादाचित्कत्वात्तासां
चित्तवृत्तीनांसदाज्ञातत्वंनोपपद्येतेत्यर्थः पुरुषस्यचितिरूपस्यसदैवाधिष्ठातृत्वेनव्यवस्थित
स्यपदंतरंगत्वेयेनिर्मलेसत्वेतस्यापिसदैवावस्थितत्वात्येनयेनार्थेनोपरक्तंभवतितथाविधस्यद
पस्यसदैवचित्तक्रियासंक्रांतिसद्भावः तस्मात्तस्यासिद्धंसदाज्ञातत्वमितितनकाचित्परिणामित्वशंका
ननुचित्तमेवसत्वोत्कर्षाद्यदिप्रकाशकंप्रकाश्यंचतदास्वपरप्रकाशकत्वादात्मानमर्थंचप्रकाशय
तीतितावतैवव्यवहारसमाप्तेःकृतंग्रहीत्रन्तरेणेत्याशंकामपनेतुमाह नतत्स्वाभासंदृश्यत्वात्
नचित्तंस्वाभासंस्वप्रकाशकंनभवति पुरुषवेद्यंभवतीयावत् कुतः दृश्यत्वात् यत्किलदृश्यं
तद्दृष्टवेद्यंदृष्टं यथाघटादि वेद्यंचचित्तंतस्मान्नस्वाभासं ननुचसाध्याविशिष्टोयंहेतुः दृश्यत्वमेव
चित्तस्यासिद्धं किंचस्वबुद्धिवेदनद्वारेणपुरुषाणांहिताहितप्राप्तिपरिहाररूपाप्रवृत्तयोदृश्यन्ते तथा
हि क्रुद्धोहंभीतोहंमत्ररागइत्येवमाद्याःसंविदोबुद्धेरसंवेदनेनोपपद्यन्तइत्याशंकांनिरसितुमा
ह एकसमयेचोभयानवधारणम् अर्थस्यसंवित्तिरिदंतयाव्यवहारयोग्यतापादनमयमर्थः स्वरूहे
तुर्बुद्धेःस्वहेतुर्वित्ति बुद्धेस्तुसंविदहमित्येवमाकारेणस्वबुद्धेःस्वरूपतयाव्यवहारसमर्थतापादनं ए
वंविधंचव्यापारद्वयमर्थप्रत्ययतत्ताकालेनयुगपत्कर्तुंशक्यं विरोधात् नहिविरुद्धयोर्व्यापारयो

फलापत्तिसंभवोऽस्ति एकस्मिंश्च काले उभयस्वरूपस्यार्थस्य चावधारयितुमशक्यत्वान्न चित्तं स्वप्र
काशकमित्युक्तं भवति किंच एवंविधव्यापारद्वयापन्नस्य फलद्वयस्यासंवेदनाद्बहिर्मुखतयैवार्थनि
ष्ठत्वेन चित्तस्य संवेदनादर्थनिष्ठमेव फलं न स्वनिष्ठमित्यर्थः ननु मा भूद्बुद्धेः स्वयंग्रहणं बुद्ध्यन्तरे
ण भविष्यतीत्याशंक्याह चित्तान्तरदृश्ये बुद्धिस्वरूपबुद्धेरतिप्रसंगः स्मृतिसंकरश्च यदि बुद्धिर्बु
द्ध्यन्तरेण वेद्यते तदा साऽपि बुद्धिः स्वयं बुद्ध्यन्तरं प्रकाशयितुमसमर्थेति तस्याग्राहकं बुद्ध्यन्तरं कल्पनीयं
तस्यापिअन्यनवस्थात्पुरुषायुषेणाप्यर्थप्रतीतिर्न स्यात् नहि प्रतीतावप्रतीतायामर्थः प्रतीतो भव
ति स्मृतिसंकरश्च प्राप्नोति रूपे रसे वा समुत्पन्नायां बुद्धौ तद्ग्राहिकाणामनन्तानां बुद्धीनां समुत्प
न्नैर्बुद्धिजनितैः संस्कारैर्यदा युगपत् बह्व्यः स्मृतयः क्रियन्ते तदा बुद्धेरपर्यवसानाद्बहिस्मृती
नां युगपदुत्पत्तेः कस्मिन्नर्थे स्मृतिरियमुत्पन्नेति ज्ञातुमशक्यत्वात्स्मृतीनां संकरः स्यादियं रूप
स्मृतिरियं रसस्मृतिरिति न ज्ञायेत ननु बुद्धेः स्वप्रकाशत्वाभावे बुद्ध्यन्तरेण वासंवेदने कथमयं
विषयसंवेदनरूपो व्यवहार इत्याशंक्य स्वसिद्धान्तमाह चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्व
बुद्धिसंवेदनम् पुरुषश्चिद्रूपत्वाच्चितिः सा अप्रतिसंक्रमा न विद्यते प्रतिसंक्रमोऽन्यत्र गमनं यस्याः
सा न तथोक्ता अन्येनासंकीर्णेति यावत् यथा गुणा अङ्गाङ्गिभावगमनेन तत्त्वपरिणामे अङ्गिनं गु
णमुपसंक्रामन्ति तद्रूपतामिवापद्यन्ते यथा वा लोके परमाणवः प्रसरन्तो विषयमाक्रामन्ति

नैवंचितिशक्तिस्तस्याः सर्वथाननुचयाद्दृष्टोनशयनादीनांपरेणशरीरवतापरार्थत्वमुपलब्धंत।
दृष्टांतबलेनतादृशएवपरः सिध्यति यादृशश्चभवतांपरोऽसंहतरूपोभिप्रेतस्तद्विपरीतस्यसिद्धेरप
मिष्टविघातकृद्धेतुः उच्यते यद्यपिसामान्येनपरार्थमात्रेव्याप्तिर्गृहीतातथापितदुपलक्षणवि
लक्षणधर्मिपर्यालोचनयातद्विलक्षणएवभोक्तापरः सिध्यति यथाचंदनवनाहृतेशिखरिणि
विलक्षणधूमाद्वह्निरनुमीयमानइतरवह्निविलक्षणश्चंदनएवप्रतीयते एवमिहापिविलक्षण।
सासत्त्वात्मकस्यभोगस्यपरार्थत्वेनुमीयमानेतथाविधएवायंभोक्ताधिष्ठातापरः चिन्मात्ररूपोऽसंह।
तःसिध्यति यदिवातस्यपरत्वंसर्वोत्कृष्टत्वमेवप्रतीयतेतथापितामसेभ्योविषयेभ्यः प्रकृष्यतेश
रीरंप्रकाशरूपेंद्रियाश्रयत्वात् तस्मादपिप्रकृष्यंतेइंद्रियाणिततोपिप्रकृष्टंसत्त्वंप्रकाशरूपंतस्या।
पियः प्रकाशः प्रकाशकविलक्षणः सचिद्रूपएवभवतीतिज्ञातस्तस्यासंहतत्वं इदानींशास्त्रफल
कैवल्यंदशभिः सूत्रैर्निर्णेतुमाक्रमते २४ विशेषदर्शिनआत्मभावभावनानिवृत्तिः एवंसत्त्वपुरुषयो
रन्यत्वेप्रतिपादितेयस्तयोर्विशेषंपश्यति अयमस्मादन्यइत्येवंरूपं तस्यविज्ञातचित्तस्वरूपस्यचि
त्तेयाश्चात्मभावनासानिवर्तते चित्तमेवकर्तृज्ञातृभोक्त्रभिमानोनिवर्तते तस्मिन्सतिकिंभ
वतीत्याह २५ तदाविवेकनिम्नंकैवल्यप्राग्भारंचित्तं परस्पराताननिम्नमथवाविवेकबहिर्मुखंविष
योपभोगफलंचित्तमासीत्तदिदानींविवेकनिम्नंविवेकमार्गमंतर्मुखंकैवल्यप्राग्भारंकैवल्यप्रा
रंभवासंपद्यते इतिअस्मिंश्चविवेकवाहिनिचित्तेयेंतरायाःप्रादुर्भवंतितेषांहेतुप्रतिपादनद्वारेण

त्यागोपायमाह २७ तच्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः तस्मिन्समाधौ स्थितस्य छिद्रेष्वंतरालेषु
यानि प्रत्ययांतराणि व्युत्थानरूपाणि ज्ञानानि प्राग्भवीयव्युत्थानानुभवेभ्यः संस्कारेभ्योऽहं मम
त्येवं रूपाणि क्षीयमाणेभ्योपि प्रभवंति अतः कारणोच्छित्तिद्वारेण तेषां हानं कर्तव्यमित्युक्तं भ
वति हानोपायश्च पूर्वमेवोक्तमित्याह २८ हानमेषां क्लेशवदुक्तं यथा क्लेशानामविद्यादीनां
हानं पूर्वमुक्तं प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेः धर्ममेघः समाधिः २९ प्रसंख्यानं पंचा
नां तत्त्वानां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वरूपपरिभावनं तस्मिन्सत्यपि कुसीदस्य
फललिप्सोः प्रत्ययांतराणामनुदये सर्वप्रकारविवेकख्यातेः परिपोषात् धर्ममेघः अनेन प्र
कारेण धर्मस्यैव तानेहत्वमित्युपपादितं भवति तस्माद्धर्ममेघात्किं भवतीत्याह ततः क्लेशक
र्मनिवृत्तिः क्लेशानामविद्यादीनामभिनिवेशांतानां कर्मणां च शुक्लादिभेदेन त्रिविधानां ज्ञानोदयात
पूर्वकारणनिवृत्त्या निवृत्तिर्भवतीत्यर्थः निवृत्तेषु तेषु किं भवतीत्याह ३१ तदा सर्वावरणमला
पेतस्य ज्ञानस्यानंत्यात् ज्ञेयमल्पं आव्रियते चित्तमेभिरित्यावरणानि क्लेशाः तदपायेन ज्ञानस्यानंत्यं हि
तस्य ज्ञानस्य गगनस्येव गगननिभस्यानंत्यादनवच्छेदात् ज्ञेयमल्पं गगनास्पदं भवत्यल्पेनैव
सर्वं ज्ञेयं ज्ञानातीत्यर्थः ततः किं भवतीत्याह ३२ ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणा
नां कृतो निष्पादितो भोगापवर्गलक्षणः पुरुषार्थः प्रयोजनं यैस्ते कृतार्थाः गुणाः सत्वरजस्तमां
सि तेषां परिणामः आपुरुषार्थसमाप्तेरानुलोम्येन प्रातिलोम्येन वांगांगिभावावस्थितिलक्षण।

त्तस्य योसौ क्रमो वर्त्तमाणस्य परिणामापरान्तनिर्ग्राह्यानुनकृङ्गवत्प्रत्यक्षः क्रमस्योक्तस्य लक्षणमाह १२
पुरुषार्थशून्यानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा चितिशक्तिरिति ३४ भोगापवर्गलक्षणपुरुषा
र्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमपरिणामसमाप्तौ विकारानुद्भवात् यदि वा चितिशक्तेर्वृत्ति
सारूप्यनिवृत्तौ स्वरूपमात्रेवस्थानं कैवल्यमुच्यते नेन केवलात्मदर्शनं सेत्रत्तः कैवल्यावस्थायामे
वंभूतश्चिद्रूपायां पुरुषो नातरेच्छापि विम्रूपमाणमेव रूपो वा तिष्ठते तथा हि संसारदशायामात्मा
नस्तत्वभोक्तृत्वानुसंधातृत्वानुमेयः प्रतीयते अन्यथा यथमेकः ते त्रस्तथा तथा संस्काराणामा
पिकर्त्तव्यं यथा ते ज्ञानाग्नि नाप्लुष्टादग्धबीजकल्पान पुनश्चित्तभूमौ प्ररोहं लभंते तथा संस्काराश्च
पि एवं प्रत्ययांतरानुदयेन स्थिरीभूते समाधौ योयाहृग्यास्य योगिनः समाधेः प्रकर्षप्राप्तिर्भवति त
था विधमुपायमाह २८ विधानस्यात् तदा तानलक्षणानामेव पूर्वापरानुसंधानशून्यानामभावेनिय
तः कर्मफलसंबंधानस्यास्यात् कृतनाशाकृताभ्यागमप्रसंगश्चापदिदियेनेव शास्त्रोपदिष्टम
नुष्ठितं कर्म तस्यैव भोक्तृत्वं भवेत् तदाहितप्राप्त्यहितपरिहाराय सर्वस्य प्रवृत्तिर्घटेत सर्वे
व व्यवहारस्य हानोपादानलक्षणस्यानुसंधानेनैव व्याप्तत्वात् न क्षणानां परस्परभेदेनानुसंधा
नशून्यत्वादनुसंधानाभावे कस्यचिदपि व्यवहारस्यानुपपत्तेः कर्तृभोक्तृस्थानीयः सश्चात्मेति
व्यवस्थाप्यमानो तद्दशायां सकलग्राह्यग्राहकलक्षणव्यवहाराभावाच्चैतन्यमात्रमेवशिष्यते न च
तत्संचितिमात्रत्वेन वापपद्यते न पुनरात्मसंवेदनेन यस्मात् विषयग्रहणसामर्थ्यमेव चितेरूपं

नात्मग्राहकत्वं तथाहि अर्थश्चिताग्रह्यमाणोप्यमितिनिगृह्यते इदं न गृह्यमाणमहमितिः न पुनर्युगप
दुहिं सुखतातसुखतालक्षणं व्यापारद्वयं परस्परविरुद्धकार्यं घोअंप्युतरोव। सिद्धसमयेव्यापारद्वय
वा तेमप्याषपत्वात् चिद्रूपनैवावशिष्यते अतो मोक्षावस्थायां निर्गुणाधिकारेषु गुणेषु चिन्मात्ररूप
एवात्मा व्यवस्थित इत्येवयुक्तं। संसारदशायां तु एवंभूतस्यैव कर्तृत्वभोक्तृत्वं च सर्वमुपपद्यते त
थाहि यायं प्रधानस्य सहावादिनैवसर्गिकोस्य भोक्तृभावलक्षणः सर्वथाविवेकाख्यातिमूला
तस्मिन्सति पुरुषार्थकर्तव्यतारूपत्वात्। इह प्रसङ्गावेपा महदादिभावेन परिणतिस्तस्यां सत्यां सति
तदात्मनोधिष्ठानात् तु चिद्रूपा प्रसमर्थ्य सामर्थ्यं कदि सत्वस्य संक्रान्तचिच्छायाग्रहणसामर्थ्यं चिद्व
भ्रम्याया स्ववद्देपार्यं कर्तृत्वभान्त्याध्यवसायपत्तत्रावसर्वस्यानुसंधानं एवं सर्वस्य व्यवहारस्व।
निष्पत्तेः किमन्यैः फलभिकल्पनाजालैः यदि न एवंभूतमागव्यतिरेकेणापारमार्थिकमात्मनः
परिणामित्वप्रसङ्गः परिणामित्वाच्चानित्यत्वं तस्यात्मत्वमेव न।
कवतत्वा यत्नीक्रियते तदास्य परिणामित्वप्रसङ्गः परिणामित्वाच्चानित्यत्वं तस्यात्मत्वमेव न।
कवतत्वाद्यनीक्रियते तदास्य परिणामित्वप्रसङ्गः विरुद्धावस्थानुभवः संभवति तथाहि यस्याम
स्यात न यत्कस्मिन्नेव समये एकेनैव रूपेण परिविरुद्धावस्थानुभवः संभवति ॥ त्वेन तस्यामेवावस्थायां इत्वान
वस्थायामात्मसमवेतस्सुखत्पन्नेस्तु ॥ खेन तस्यानुभविति ॥ तेन तस्यामेवावस्थायां दुःखान
भवित्रमनोवस्थानानात्वात् तदभिन्नस्यावस्थातोपि नानात्वं नानात्वेन परिणामित्वात् नात्म
त्वं नापि त्यक्तं अत एव शान्तब्रह्मवादिभिः सांख्यैरात्मनः सदैव संसारदशायां चैकरूपत्वमङ्गी
क्रियते यत्तु वेदान्तवादिनश्चिदानन्दमयत्वमात्मनो गादेमन्यते तेषां नयुक्तः पक्षः तथाहि

आनंदस्य स्वरूपत्वात् सुखस्य च संवेद्यमानतया व्यप्रतिभासात् संवेद्यमानत्वं संवेदनव्यतिरेके
णानुपपन्नमिति संवेदनसंवेद्ययोरभ्युपगमाद्द्वैतहानिः अथ सुखात्मकत्वमेव तस्योच्यते त
द्धि तद्धर्मत्वादनुपपन्नं नहि संवेदनं संवेद्यं चैकमभवितुमर्हति किंचाद्वैतवादिभिः कर्मात्म
परमात्मभेदेनात्मनः स्यात् तदा द्विविध उच्यते तत्र येनैव रूपेण सुखदुःखभोक्तृत्वं कर्मात्मनः ते
नैव रूपेणापि परमात्मनः स्यात् तदा कर्मात्मवत् परमात्मनः परिणामित्वं अविद्यास्वभावत्वं च
स्यात् अथ तत्समानात् भोक्तृत्वं किं तत्र तद्द्वयहो किं तमुदासीनतयाधिष्ठातृत्वेन स्वीकरोतीति यदा त
दास्मद्दर्शनानुप्रवेशः आनंदरूपता च एवमेव निराकृता किं वा विद्यास्वभावत्वे निःस्वभावत्वा
त्कर्मात्मा ... धिकारी न तावत् नित्यमुक्तत्वात् परमात्मनाप्यविद्यास्वभावत्वात् कर्मा
त्मान्यतः सकलशास्त्रवैयर्थ्यप्रसंगः अविद्यामयत्वे च जगद्वैचित्र्यमालोक्य स्याविद्येति विचार्यं तत्र न
तावत् परमात्मनः नित्यनिर्मलत्वात् विद्यारूपत्वाच्च कर्मात्मनो निःस्वभावत्वात् ... विद्या प्र
त्युत्ते कथमविद्यासंबंधः अथोच्यते नैव विद्याया अविद्यात्वं परं विचारितं मरणीयत्वेनामव
ये वहि हि विचारेण दिनकरकरस्पृष्टनीहारलेखिलप्रमुपयाति सैव विद्येत्युच्यते नैव युक्तं
किंचित्कार्यं करोतीति तद्वक्तव्यं ... चित् भिन्नमभिन्नं वा वक्तव्या अविद्यायाश्च संसारलक्षणप्रप
च कार्यं वाच्य ... अविद्याया अस्य संसारलक्षणस्य तस्मिन्नास्त्यपि यदि वा
च्यत्वमुच्यते तदा कस्यचिदपि वाच्यत्वेन स्यात् ब्रह्मणोऽप्यवाच्यतापत्तिः तस्मादधिष्ठा

तद्रूपताव्यतिरेकेणान्यदात्मनो रूपमुच्यते अधिष्ठातृत्वं च चिद्रूपत्वमेव तद्व्यतिरिक्तस्य धर्मस्य
कस्यचित् प्रमाणानुपपत्तेः येऽपि नैयायिकादिभिरात्मा चेतनात्तेनायोगात् चेतन इष्य
ते चेतना चितस्य मनःसंयोगजा तथा हि इच्छाज्ञानप्रयत्नादयो गुणास्तस्य व्यवहारदशाया
मात्मनः संयोगादुत्पद्यन्ते तैरेव च गुणैः समानाधिकरण्याच्चेतन इति व्यपदिश्यते मोक्षदशायां त्वमि
च्छाज्ञाननिवृत्तौ तत्फलानां दोषाणामपि निवृत्तेस्तेषां बुद्ध्यादीनां विशेषगुणानामत्यन्तोच्छि
त्तेः स्वरूपमात्रप्रतिष्ठत्वमात्मनोऽङ्गीक्रियते तेषां न युक्तः पक्षः यतस्तस्यां दशायां किमात्मन
आत्मत्वं व्यापकत्वादयो गुणा आकाशादीनामपि सन्ति अतस्तत्स्वलक्षणेनात्मनः किंचिद्रूपं
चावश्यमङ्गीकर्तव्यं आत्मत्वलक्षणजातियोग इति चेत् सर्वस्यैव हि स्वजातियोगः संभवति
अतोऽन्यावैलक्षण्यमात्मनोऽवश्यमङ्गीकर्तव्यं तच्चाधिष्ठातृत्वं चिद्रूपतयैव घटते तेनास्मद्यायैर
पि मीमांसकैर्महत्परात्माङ्गीक्रियते तेषामपि न युक्तः पक्षः तथा हि अहंप्रत्ययग्राह्य आत्मे
ति तेषां प्रतिज्ञा अहंप्रत्यये च कर्तृत्वं कर्मत्वं चात्मनः न चैतद्विरुद्धत्वादुपपद्यते कर्तृत्वं प्रमा
तृत्वं प्रमाणकर्मत्वं च प्रमेयत्वरूपं न चैतद्विरुद्धधर्माध्यासादेकस्य घटते यद्विरुद्धधर्माध्या
सितं न तदेकं यथा भावाभावौ भावाभावौ विरुद्धे च कर्तृत्वकर्मत्वे अथोच्यते न कर्तृत्वकर्मत्वयो
६ विरोधः किं तु कर्तृत्वकरणत्वयोर्विरोधः केनैतदुक्तं विरुद्धधर्माध्यासस्य तुल्यत्वात् तस्मा ६
दहंप्रत्ययग्राह्यत्वं परिहृत्यात्मनोऽधिष्ठातृत्वमेवोपपन्नं यच्चैतन्यत्वमेव येऽपि द्रष्टृव्यापर्या
न

6

यभेदेनात्मनोव्यापकस्य शरीरपरिमाणत्वमिष्यते तेषां तु स्थानपराहततरावयवः परिणामित्वे चिद्रू
पताहानिश्चिद्रूपताभावे किमात्मनश्चात्मत्वेनातस्मादात्मनश्चात्मत्वमिच्छता चिद्रूपत्वमेवांगीकर्त
व्यं तच्चाधिष्ठातृत्वमेव कचित कर्तृरूपमेवात्मानात्मत्वेनाभिमतमिति तथाहि विषयसन्निधाने।
यात्तानलक्षणाक्रियासमुत्पन्ना तस्या विषयसंवित्तिः फलं तस्याश्च फलरूपायाः संवित्तेः स्वरूपप्र।
काशरूपतया प्रतिभासते विषयश्च ग्राह्यतयात्मग्राहकत्वेन च घटमहं जानामीत्यनेनाकारेण तस्याः समु
त्पत्तेः क्रियाकारणं कर्तृत्ववतीत्यर्थः कर्तृत्वभाक्त्वं चात्मनाइमिति तदिहानुपपन्नं यस्मात्तासां सं
वित्तीनां च किं कर्तृत्वं यत्कारणं कर्तृ युगपत्प्रतिपद्यते क्रमेण वा युगपत् कर्तृत्वे क्षणान्तरे तस्य कर्तृत्वे
न स्यात् अथ क्रमेण कर्तृत्वं तदेकरूपस्य न घटते एकेन रूपेण चेत्तस्य कर्तृत्वं तदेकस्य देव सन्नि
हितत्वात् सर्वफलरूपमेकं स्यात् अथ नानारूपतया तस्य कर्तृत्वं तदा परिमाणित्वं परिणामित्वा
च्च न चिद्रूपत्वं यद्यपि चिद्रूपत्वमात्मन इष्टं बौद्धैः न सादात्मकर्तृत्वमंगीकर्तव्यं यदाह ग्रामस्माभिः।
कर्तृत्वमात्मनः प्रतिपादितं कृतस्यानित्यस्य चिद्रूपस्य तदेवोपपन्नं एतेन स्वप्रकाशस्यात्म।
नो विषयसंवित्तिद्वारेण ग्राहकत्वमभिव्यज्यत इति यद्वदन्ति तेषां नेनैव निराकृताः केचिद्विमर्षा
त्मकत्वेनात्मनः ग्राह्यमयत्वमिच्छन्तीति तेषां च न विमर्षव्यतिरेकेण चिद्रूपत्वमात्मनो निरूपाधि
त्वं प्राकां जडात्किल वैलक्षण्यं चिद्रूपत्वमुच्यते तच्च विमर्शव्यतिरेकेण निरूपमाणं नान्यथा
वति एतेन तदनुपपन्नमिदमित्थमेवं रूपमिति यो विचारः स विमर्श इत्युच्यते स चास्मिताख्याति

रेकेणोत्थानमेव न लभेत तथा हि आत्मन्युपजायमानो विमर्शोहमेवंभूत इत्यनेनाकारेण संवे
द्यते तत्र चाहमित्यंशस्तस्मिन्नस्यावत्सलक्षणस्यार्थस्य तत्र स्फुरणात् न विकल्पस्वरूपत्वान्नाहंकारा
नुप्रवेशरूपतातिक्रमः विकल्पश्चाध्यवसायात्मकबुद्धिधर्मेण चिद्धर्मः कूटस्थत्वेनाभिमतः तदेवं के
स्वरूपत्वान्नाहंकारानुप्रवेशः तदनेन विमर्शनमात्मनः प्रतिपादयता बुद्धिरेवात्मत्वेन भ्रान्त्या प्र
तिपादिता न प्रकाशात्मनः परस्य पुरुषस्य स्वरूपस्य स्वरूपमवगतमिति तिष्ठत्येतत्सर्वेषु दर्शने
ष्वधिष्ठातृत्वं विहाय नान्यदात्मनो रूपमुपपद्यते अधिष्ठातृत्वं च चिद्रूपत्वं तच्च जडादि लक्षणमे
व चिद्रूपतया चेतितं सदेव भोग्यतामेति यच्चैतेनाधिष्ठितं तदेव सकलव्यवहारयोग्यं भवति
गर्व चसति कृतकृत्यत्वात्प्रधानस्य व्यापारनिवृत्तौ यदात्मनः कैवल्यमस्माभिरुक्तं तद्धि हा
यदर्शनेनान्तर्गणमपि नान्यागतिस्तस्मादिदमेव युक्तमुक्तं वृत्तिसारूप्यपरिहारेण स्वरूपप्रतिष्ठा
चितिशक्तिः कैवल्यं तदेवं सिद्ध्यन्तरेभ्यो विलक्षणं सर्वसिद्धिमूलभूतं समाधिमभिधाय जात्यन्तरपरि
णामलक्षणस्य विशेषस्य च प्रकृत्यापूरणमेव कारणमित्युपपाद्य धर्मादीनां प्रतिबंधकनिवृ
त्तिमात्र एव सामर्थ्यमिति प्रदर्श्य निर्माणचित्तानामस्मितामात्रादुद्भव इत्युक्त्वा तेषां च योगिचि
त्तमेवाधिष्ठातृकमिति प्रदर्श्य योगचित्तस्य चितरावैलक्षण्यमभिधाय तत्कर्मणां चालौकि
कत्वं चोपपाद्य विपाकानुगुणानां वासनानामभिव्यक्तिसामर्थ्यं कार्यकारणयोरेकत्वप्रतिपा
दनेनाव्यवहितानामपि कारणमानन्त्यमुपपाद्य तासामानन्त्यादपि हेतुफलादिद्वारेण हान

२

मुपदिश्यातीतादिष्वध्वसुधर्माणांसद्भावमुपपाद्यविज्ञानवादंनिराकृत्यसाकारवादं चप्रतिष्ठाप्यपु
रुषस्वातन्त्र्यमुक्त्वाचित्तद्वारेणसकलव्यवहारनिष्पत्तिमुपपाद्यपुरुषसिद्धौप्रमाणमुपदर्श्यकै
वल्यनिर्णयायापदशाभिः सूत्रैः क्रमेणोपयोगिनोर्थानभिधाय सर्वेयस्ययशःप्रतापवशानपा
दोनमेवाधिनविभ्रन्मुकुटेषुमूर्द्धसुदयन्याप्तांधरित्रीभृतः यवकाशमवाप्यगर्वमणामंवाद्वे
वतापिस्थितास्यश्रीभोजमहीपतिः फणिपतेःसूत्रेषुवृत्तिंव्यधात् कैवल्यस्वरूपंनिर्णीतामि
निर्व्याकृतः कैवल्यपादः प्रशास्त्रान्तरेकैतदेवकैवल्यमुपपन्नमित्युपपाद्य ॥ इतिश्रीभोजदे
वविरचितायांराजमार्तण्डाभिधायांपातञ्जलयोगशास्त्रसूत्रवृत्तौकैवल्यपादश्चतुर्थः ॥४॥

86

योगसूत्रवृत्तिं भोजराजकृता राजमार्तण्डाभिधा

नं. २०

नं ११

8

